CC-0. In Public Domain. Digitization by eGangotri

ॐ

प्रपञ्चाप्रपञ्च-प्रकाशः

गणेशप्रसादः गौतमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

प्रपञ्चाप्रपञ्चप्रकाशः

गणेशप्रसादः गौतमः

वाल्मीकि क्याम्पस
पुस्तकालयलाई
उपहार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः

प्रकाशचन्द्रः गौतमः

काष्ठमण्डपः नेपालः

(पशुपति–देवपत्तनम्)

प्रथमे संस्करणे

१००० पुस्तकानि

२०३९ विक्रमशरदः फाल्गुनसङ्क्रान्त्यां ।

मुद्रकः

लुषमुद्रणालयः

नेपाले काष्ठमण्डपे

बानेश्वरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चिन्मन्तव्यम्

विदुषो गौतमस्य श्रीगणेशप्रसादमहोदस्य प्रपञ्चाप्रपञ्चप्रकाशमहं सरसग्राहमाद्योपान्तमपश्यम् । अत्र द्वौ भागौ स्तः । प्रथमे प्रपञ्चात्मके भागेऽस्मत्समाजे वर्तमानानां दुर्बलहृदयानामात्मसंमानविरोधिनां भावनासु चरित्रेषु च निर्दयः खड्गप्रहारोऽस्ति । द्वितीये पारमार्थिके भागे सकलनिगमागमजेगीयमानमाहात्म्यातिशयस्य, विश्वब्रह्माण्डप्रकाशमूलस्रोतसो ज्ञानस्वरूपस्य तत्र भगवतः सर्वशक्तिमतोऽग्निदेवस्य विराजोऽनिर्वचनीयशक्तेर्माहात्म्यस्य च स्तुतिगानमस्ति ।

एतेनैतत्स्पष्टमभिव्यज्यते– लेखकमहोदय एकतो भावनागतं चरित्रगतं च सकलं दौर्बल्यं व्यङ्ग्यात्मकोपदेशेन निरस्य वर्तमानं नेपालीयसमाजं निर्मलं कर्तव्यनिष्ठं च विधित्सति । अपरतो भगवतोऽग्निदेवस्योपासनायां साकल्येन स्वं समर्प्य कमप्यलौकिकमनिर्वचनीयं पुरुषार्थविशेषं सिषाधयिषति च ।

तदीयैतल्लक्ष्यपूर्तये ममाऽप्यस्ति हार्दिकी शुभकामना– 'भगवान् जातवेदाः स्वं प्रियभक्तमचिरात् सफलयतुतमाम् । यतोऽस्मिन् कलियुगे विरला एवैतादृशा विद्वांसो लोकाऽभ्युदयाय स्वनिःश्रेयसाय चैवमुपक्रमन्ते !

साधारणकविजनेयशोलिप्सासाधनभूताया ईषन्महिम्नः काव्यशैल्यादिविवेचनायास्तु किं मूल्यं प्रकृतविषयस्य महत्तायाः पुरः ? तथात्वेऽपि, तत्राऽपि यदि कस्यचित् जिज्ञासा, पिपृच्छा भवेताम् तत्कृतेऽपि द्विचतुराः शब्दा लिख्यन्ते– प्रथमतो भाषामेव प्रकृत्य ब्रवीमि । भगवत्याः संस्कृतभाषाया एवं निःस्वार्थोपासना सत्यं हिन्दुत्वस्य, ब्रह्मण्यस्य, संस्कृतभाषात्मभूताया विश्वशान्तिभावनाया एव सहजं विज्ञापनं लेखकमहोदयस्याऽन्तर्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयस्य । यत एवं प्रयासाय कस्माद्भूवेदद्यत्वे प्रोत्साहनमादरः संमानलेशो वा? न समाजात्, न सर्वकारात्, न वा संस्कृतविद्वत्समाजात् । न चाऽद्यास्ति युगं राजर्षेः सत्यहरिश्चन्द्रस्य, न वा दाशरथेः राज्ञो रामचन्द्रस्य ! तथात्वेऽपि संस्कृतप्रचारप्रसारायैवं त्यागः, एवं प्रयासः ! इत्येतत् सत्यम् उद्भावयति चित्तेऽस्माकं महान्तं हर्षोद्रेकं श्रद्धातिशयं च ।

किञ्च– यच्च कृतिनिष्ठं प्रौढिमप्रकर्षं कलासौन्दर्यमत्र दरीदृश्यते, एतेन पुरातनी संस्कृतयुगीना काऽपि काव्यशैली पुनरग्रतः साक्षाद् भवन्तीव प्रतिभाति । यतः पारमार्थिकभागगता मधुरा, सस्तरा, संस्कृतोचितैतादृशी काव्यशैली प्रायो नाऽर्वाग् दृष्टिपथमायाति !

अत एतं स्तुयं प्रयासं हृदयतः स्तावं स्तावं संस्कृततापसं प्रकृतं लेखकमहोदयं परशतैर्धन्यवादैर्भूयोभूयोऽभिनन्दामि । जयतु संस्कृतम् !

२०३८।३।७ – पूर्णप्रसादः 'ब्राह्मणः'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'प्रपञ्चाप्रपञ्च-प्रकाश'स्य विषये

श्रीगणेशप्रसादगौतमप्रणीतोऽयं 'प्रपञ्चाप्रपञ्च-प्रकाशः' भागद्वये विभक्तोऽस्ति-पूर्वभागः, उत्तरभागश्चेति। अस्य पूर्वभागः प्रपञ्चात्मकः, उत्तरभागस्तु अप्रपञ्चात्मको यद्वा पारमार्थिकः। 'कल्पेत यः समुद्धर्तुम्' इत्याद्येकश्लोकात्मकसमुद्गारपूर्वकं सङ्ग्रथितेऽस्मिन् पूर्वभागे सन्ति १०९ श्लोकाः। तेषु रथोद्धताबद्धमन्तिमं विहाय सर्वेऽन्ये श्लोका अनुष्टुप्छन्दोबद्धाः। १९८ श्लोकसंवलितेऽस्योत्तरभागे तु कविः प्रथमतः 'व्यलीकगुणदोषाणाम्' इत्याद्येकपद्येन स्तुतिं वा निन्दां च परित्यज्य सारमात्रसमाकलने मधुपा इव प्रवर्तन्ते सज्जना इत्युद्गिरति ततः 'विभावसु-प्रार्थना-तुष्टम्' इति शीर्षके श्लोकद्वये स्वधर्मस्य, स्वसंस्कृतेः, स्वादर्शस्य, स्वराष्ट्रस्य च समुद्बोधनार्थं पावकमभिवादयदि ग्रन्थभागञ्चेमं तस्मै समर्पयति। द्वितीयेऽस्मिन् भागे आरम्भात् ९५ पद्यपर्यन्तमनुष्टुपः, ९६ पद्यात् १११ पद्यपर्यन्तं शशिवदनायाः. ११२ श्लोकात् १८८ श्लोकपर्यन्तं पुनरनुष्टुपः, १८९ पद्यात् १९२ पद्यपर्यन्तं मणिबन्धस्य, १९३-९४ पद्यद्वये चम्पकमालायाः, १९५-९६ श्लोकद्वये पनरष्टुनुपः, १९७ पद्ये वसन्ततिलकायास्तथाऽन्तिमे पद्ये तु शार्दूलविक्रीडितनामकच्छन्दसः प्रयोगः कविना विहितो वर्तते। इत्थं छन्दःप्रयोगदृष्टचा ग्रन्थस्याऽस्योत्तरभागः पूर्वभागापेक्षया विविधतामयः, प्रवाहमयः, सङ्गीतिमयश्चेति स्वत एवाऽनुभूयते। अपेक्षाकृतो बृहदायामश्चाऽयमुत्तरभागः।

प्रपञ्चात्मके पूर्वभागे प्रारम्भिकं पद्यत्रयमतीव महत्त्वपूर्णम्। अत्र कविः प्रथमतस्तृष्णादेवीं नमस्करोति- 'तृष्णे देवि! नमस्तुभ्यम्' इति। कवेस्तृष्णादेवी चाऽत्र लोकोत्तरचमत्कारिणी, महाशक्तिस्वरूपिणी, सर्वान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तलचारिणी। एतादृशीं तृष्णादेवीं नमस्कुर्वन् संबोधयन्त्र कविरात्मनो जीवनीगाथात्मकं प्रपञ्चमत्र प्रस्तौति, श्रुतदृष्टानुभूतिमयी प्रस्तुतिश्चेयं तस्या एव कृष्णादेव्याः प्रसादायेति च वदति।

अथाऽग्रे कविरात्मजीवनं श्वजीवनेन किंवा कुक्कुरजीवनेन सह समीकुर्वन् नानाप्रकारेण कुक्कुरप्रवृत्तिं प्रतिपादयति–प्रदर्शयति यथा–

'च्यै'–कारेण समाह्वानं, 'धर्-धत्'–कारेण भर्त्सनम्।
विधूननाद् अगुच्छस्य पुच्छस्य प्रभुतोषणम् ॥ ४ ॥
घोणया जिघ्रतः 'सूँ-सूँ' चक्षुर्भङ्गचाऽभिपश्यतः।
'च्यै'-काराकृष्टकर्णस्य, धन्येयं मे श्वजीवनी ॥ ६ ॥
अहं पूर्वमहं पूर्वमितीर्ष्याविशवेगतः।
उञ्छानुञ्छत उच्छिष्टान्, धन्येयं मे श्वजीवनी ॥ ८ ॥
बलवन्तं विलोक्यैव, ह्याँ ! ह्याँ" ति स्वरभङ्गतः।
असकृन् 'ङिच्च-ङिच्चेति'– दंष्ट्रा दर्शयतः सतः ॥ १० ॥
इत्यादिः।

उपर्युद्धृतेषु श्लोकेषु 'च्यै' 'धर्-धत्' 'सूँ-सूँ' 'ह्याँ-ह्याँ" ' 'ङिच्च-ङिच्च' इत्यादिकमुल्लेखनीयम्, किमिति चेदेतेऽस्माकं नेपालिभाषाया निजत्वपूर्णा अनुकरणात्मकाः शब्दाः। एतादृश-शब्द-प्रयोगमात्रेण ग्रन्थोऽयं नेपालिलेखक-कृतिरिति परिचीयते। 'धन्येयं मे श्वजीवनी' इतिपदावलिर्ध्रुवपदमिव पौनपुन्येन प्रयुक्ता प्राप्यतेऽत्र, इदमपि शक्यते कथयितुं कवेर्निजत्वमयी पद्धतिरिति। कविरसकृत् कथयति 'धन्येयं मे श्वजीवनी ?' इति। न हि कवेरेव, अपितु अस्माकमपि सर्वेषां सांसारिकजीवनं यद्वा लौकिकजीवनं प्रपञ्चात्मकं तृष्णामयञ्च; एतादृशं तृष्णामयं जीवनं वस्तुतः कुक्कुरजीवन-मेवाऽतीवदुःखमयम् अशान्तिमयञ्च। एतज्जीवनं लक्ष्यीकृत्य प्रयुक्तोऽत्र धन्येति-प्रयोगः सर्वथा व्यङ्ग्यात्मकः, कविः श्वजीवनात्मकं स्वजीवनमसकृद् धिक्करोति 'धन्येयं मे श्वजीवनी' इति।

कविरत्र द्रष्टा अस्ति। तेन दृष्टं कुक्कुरजीवनं नानाप्रवृत्तिमयम्। प्रभुतोषणप्रवृत्तिः, शर्मपरित्यागप्रवृत्तिः ईर्ष्याप्रवृत्तिः, दुर्बलदलनप्रवृत्तिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सबलसेवाप्रवृत्तिः, रोषप्रवृत्तिः' आशाप्रवृत्तिः, लोभप्रवृत्तिः इत्यादिप्रवृत्तयः कुक्कुरजीवने मनुष्यजीवने च समाना एव । अथ चैतादृक्–प्रवृत्तिपरं कुक्कुरमात्मसात्कृत्य यद्वाऽऽत्मानं कुक्कुरे प्रवेश्य कविरत्र यद् यत् कथयति तत्सर्वं न केवलं कुक्कुरसामान्यं न वा कविसामान्यमेव, अपितु सर्वजनसामान्यं किंवा मानवमात्रसामान्यं यद्यप्ययं पूर्वभागः कुक्कुरपरकमात्रं प्रतिभाति स्थूलदृष्ट्या । इत्थं सामान्यीकरणमत्र कवेर्महती कला, महत् कौशलमिति स्वतः स्पष्टम् ।

नेह इयन्मात्रम्, अत्र तु कवेर्वैयक्तिकजीवनस्य, पारिवारिकजीवनस्य तथा सामाजिकजीवनस्य च नानानुभवसन्दर्भा अपि सहैवाऽनुस्यूताः अनुप्रविष्टाः संश्लिष्टा वा वर्तन्ते । किन्तु एते सन्दर्भा न खलु सुखात्मकाः, अपितु दुःखात्मका एव । कविनाऽत्र प्रपञ्चात्मकमिदं सांसारिकजीवनं दुःखात्मकत्वेनैव एवं समस्तसांसारिकदुःखमपि तृष्णामूलकत्वेनैवाऽनुभूतं दृश्यते । एवं दुःखमयस्याऽस्य समस्तसांसारिकजीवनस्याऽखिलप्रपञ्चस्य वा तृष्णैव मूलमिति कवेर्दृष्टिः । तत्त्वतस्तृष्णा अमूर्त्ता, परं कविनाऽत्र सा मूर्त्तितामानीता 'तृष्णादेवी !'– इति दिव्यतायाञ्च प्रतिष्ठापिता । तृष्णादेवी चाऽत्र ब्रह्माण्डानां नियामिका महामायेति पूर्वमपि उल्लिखितम् । जगतीतलेऽस्मिन् अस्यास्तृष्णायाः सर्वातिशायिमहत्त्वं तथा चराचरजीवनेऽस्याः सर्वाधिकप्रभुत्वं प्रदर्शयन् कविरग्रे कथयति– न केवलं मृत्युः, अपितु स्वयं मृत्युञ्जयोऽपि तृष्णावशीभूत इति प्रस्तुतसन्दर्भे पूर्वोल्लिखितेन प्रारम्भिकपद्यत्रयेण सह ३०, ३५, ३६, ३९, ५२, ५३, ५४ ६७, ९०, ९१, ९२ श्लोका अपि प्रमाणाय प्रस्तोतुं शक्यन्ते ।

अत्र स्थले-स्थले स्वभावतः प्रसङ्गतो वा स्वयमेव समायाताः कतिपयाः शब्दार्थालङ्काराः, काश्चन सूक्तयश्च दृश्यन्ते, परमस्य पूर्वभागस्य समुल्लेखनीयमपरं वैशिष्ट्यं नेदम्, तत्तु विशेषतः ५५ श्लोकाद् इत परिलक्ष्यते यत्र कविः पूर्वप्रसङ्गमग्रे सारयन् तथा नवप्रसङ्गश्चाऽऽनीयमानं सूचयन् इत्थमुद्घोषति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'सौभाग्यपूर्णजीवन्या भूयः शृणु शुभाः कथाः ।
गायामि ते प्रसत्यर्थं मूर्च्छना–भावभङ्गिभिः ।। ५५ ।।

सत्यमेव, अतः परं पूर्वप्रसङ्गश्चरमोत्कर्षमनुसरति, नवप्रसङ्गश्च कविरानयति । अयमेव नवप्रसङ्गो यद्वाऽऽधुनिकसन्दर्भः कवेः समसामयिकयुगबोधस्वरूपः प्रस्तुतपूर्वभागस्याऽवशिष्टं महद् वैशिष्ट्यं मन्ये । अत्रस्थाऽऽत्मपरा व्यङ्ग्यात्मिकाऽभिव्यक्तिरपि पूर्वापेक्षया गभीरतरा, तीक्ष्णतरा च ।

ह्योऽद्याऽस्माकं समाजे ये बाह्यदृष्टया धार्मिका दृश्यन्ते तेऽन्ततः प्रायशो दाम्भिका एव । एतादृशं दाम्भिकं प्रति तीक्ष्णं व्यङ्ग्यास्त्रं प्रहरन् कविर्ब्रूते–

मुखेन रटतो राममटतो दम्भभूमिषु ।
धर्मध्वजं समुत्तोल्य धन्येयं ने श्वजीवनी ।। ५८ ।।
चक्रत्रिशूलाऽऽकलित–भाल–दोर्दण्ड–वक्षसः ।
गृहीतदम्भदण्डस्य, धन्येयं मे श्वजीवनी ।। ५९ ।।
ध्यानस्तिमितनेत्रस्य, बकमुद्रानुकारिणः ।
बिडालव्रतराजस्य, धन्येयं मे श्वजीवनी ।। ६२ ।।
बही रामावतारस्य, स्वान्ता रावणरूपिणः ।
कालनेमिगुरोरस्य, धन्येयं मे श्वजीवनी ।।' ६३ ।।

इत्यादिः ।

कविरग्रे कथयति–ह्योऽद्य क्षमाऽशक्तौ, निष्ठा श्रीमत्पदे तथा शिक्षा विज्ञानगर्भे स्थिता; दीक्षा क्वाऽपि पलायिता; जपः कर्णेजपे तथा सन्नः श्रीमतीक्षणे स्थितः; एवं त्यागो मूत्रपुरीषयोरेवेत्यादि ।

वर्तमानविकाससन्दर्भे च कवेर्दृष्टिः कटाक्षपूर्णैव, यथा–

दश–दिक्षु विकासानां प्रकाशाः प्रसृता अहो !
सभ्यनारी–समाजस्य विकीर्णा मूर्धजा इव ।। ७४ ।।

आधुनिकधीमतां सुरापानव्यसनं लक्ष्यीकृत्य कविर्व्यङ्ग्यं प्रहरति यथा–

Nepal Sanskrit University, Balmeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वोच्चानन्द-धाराभिः स्वान्तः स्नातस्य धीमतः ।
देहाध्यास-विहीनस्य कृत्याऽकृत्यं न जानतः ।। ८४ ।।
निश्चेष्टं स्वपतो हन्त ! समदृष्टेः समस्थितेः ।
नव्योच्चनिर्विकल्पस्य, धन्येयं मे श्वजीवनी ।। ८५ ।।

पाश्चात्यप्रभावाऽभिभूतस्य तथाकथितप्रगतेरुपासकस्य स्वसंस्कृति-विमुखस्य जनस्य विषयेऽपि कवेरुक्तिर्व्यङ्ग्यात्मिकैव, यथा–

पाश्चात्य-रसिकोद्वान्तं रसं पीत्वा बलीयसः ।
भूयोऽपि प्रतिवान्तेन, तेनाऽपि पुष्टवक्षसः ।। ८६ ।।
स्वसंस्कृति-सुधाधारां तिक्तां हालाहलोज्झताः ।
उपासकस्य प्रगतेर्धन्येयं मे श्वजीवनी ।। ८७ ।।

८८–८९ श्लोकद्वये त्वनुभूयते कवेरुपहासस्तादृशं सभ्यंमन्यं सुधारवाद-भक्तं प्रति यः पाश्चात्यप्रभावेण छिन्नां भिन्नां प्राच्यसंस्कृतिं नोद्दिधीर्षते ।

एवमधोलिखितश्लोकद्वयात्तु कविर्मर्महृदाश्चर्यं प्रकटयति अस्मद्देशाद् देवमूर्तीनां पलायनविषये–प्रवसनविषये तथाऽस्य दोषभागिनश्च स आत्मान-मे मन्यते (आत्मनेपदीया व्यङ्ग्यशैलीयम्), यथा—

दुरुद्धरं दुराचारं, दुर्दशं दुरतिक्रमम् ।
मां श्रुत्वैवाऽविलोक्यैव, देवा हन्त ! पलायिताः ।। १०१ ।।
साकारा मूर्त्तयो हन्त ! प्रावसन् भयविद्रुताः ।
किमद्भुतं ! किमाश्चर्यं ! न भूतं पूर्वमीदृशम् ।। १०३

अनेकप्रकारेण कविरात्मनो वैयक्तिक–पारिवारिक–जीवनस्य, स्व-समाजस्य, स्वदेशस्य तथा स्वसंस्कृतेश्चाऽतीव दयनीयामपकर्षोन्मुखीं दुरुद्धरां दशां दर्शयित्वा, एतादृश्या दशाया वा परिस्थित्या मूलबीजन्तु तृष्णैवेति चाऽऽत्मदृष्टिं प्रकटीकृत्याऽन्तत आत्मोद्धारार्थं जगदीश्वरमग्निदेवमाह्वयति प्रार्थयति च, यथा–

दुर्धर्षे, दुःखसंघर्षे, घृष्टं मां जगदीश्वर !।
अग्निदेव ! दयामूर्ते ! समुद्धर ! समुद्धर ! ।। १०८ ।।

इत्यादिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमग्निदेवप्रार्थनया कविर्ग्रन्थस्याऽस्य पूर्वभागं समापयति यत्र तत्रैव पुनरग्निदेव(विभावसु)स्तवनेनैव सोऽस्योत्तरं भागं पारमार्थिकं प्रारभ्यति, यथा–

सर्वाधारो निराधर एकोऽनेकेषु जृम्भितः ।
जयत्यानन्दसाम्राज्य–सम्राड् देवो विभावसुः ।। १ ।।

(उत्तरभागः)

एतावता प्रस्तुतग्रन्थस्य पूर्वोत्तरभागयोः समन्विति–सेतुश्चेयमेवाऽग्निदेवस्य प्रार्थना वा स्तुतिरिति तु स्वत एव स्पष्टम् । इत्थं कविना पूर्वभागे प्रपञ्चचर्चां विधायोत्तरभागे पारमार्थिकचर्चा या समारब्धा, साऽपि वस्तुतोऽतीवोपयुक्तैव; किमिति चेत् प्रपञ्चात्मकस्य सांसारिकजीवनस्य तृष्णामूलकतामशान्तिमयतां दुःखमयताञ्च समनुभूयैव मानवः परमानन्दप्राप्तये परमार्थचिन्तनमनुसरति । तत्त्वतोऽस्योत्तरभागस्य मूलध्येयमपि विभावसु(विभा–प्रकाश एव वसुधनं स्वस्वरूपात्मकं यस्य सो विभावसुः अग्निदेवः प्रकाशस्वरूपः परमात्मैव) वन्दनारूपं परमार्थचिन्तनं यद्वाऽध्यात्मचिन्तनमेव ।

उत्तरभागेऽस्मिन् कविः प्रथमतो विभावसुं वाऽग्निदेवं सच्चिदानन्दमयं सर्वाधारमद्वैततत्त्वं यद्वा परब्रह्मस्वरूपं प्रतिपादयन् तथा स एकोऽपि अनेकेषु जृम्भितोऽस्तीति कथयन् तं स्तौति, नमति च । स एवाऽग्निदेवो द्विधा इव विभक्तः– प्रकृतिः पुरुषश्च तथा तावेव प्रकृति-पुरुषौ स्वाहाहविर्भुजौ मातापितरौ चेत्युक्त्वा कविस्तावभिवादयते । तत आवसथ्यादिपञ्चाग्निदेवान् सम्बोधयन् तथा तेषां विजयञ्च कामयमानः कविः १० श्लोकादितः साक्षिरूपिणमग्निदेवं समाराधयति तत्स्वरूपं प्रतिपादयति च । अस्मिन्नेवाऽऽराधनप्रतिपादनप्रसङ्गे स आत्मानमस्यैवाऽग्निदेवस्याऽऽत्मजं मन्यते, यथा–

चिन्तामणे ! कृपामूर्ते ! शरणागत-वत्सल ! ।
एषोऽस्मि वेदनोद्विग्नः संभावय निजात्मजम् ।। ९५ ।।

अत्र कविः स्वयं जीवात्मा, अग्निदेवस्तु साक्षीस्वरूपः परमात्मा परब्रह्मैव । तत्त्वतो जीवात्मा परब्रह्मणः परमात्मन आत्मज इव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११२ श्लोकादितः कविनाऽऽत्मनोऽम्बिकाऽपि उल्लिखिता वर्तते। कवेरम्बिका त्वत्र वृत्तिरूपाऽम्बिका कवेः पितुः परब्रह्मणः परमात्मनो वा परिचायिका। वस्तुतः पुत्रस्य पितृपरिचयप्रदाने मातेव समर्था भवति। कवेर्माता चाऽत्र पतिप्राणा (पतिःपरब्रह्म एव प्राणा जीवनं यस्याः सा)।

इमावेवाऽऽत्मनो मातापितरौ कविः स्वाहाऽग्निदेवौ च कथयति, शक्ति-शक्तिमत्- स्वरूपाविमौ प्रार्थयन् तथाऽनयोः श्रीपदद्वये पतन् सः पूर्णां शान्तिं पूर्णां स्थितिञ्च कामयते, यथा–

शक्तिमूर्त्तिर्ममाम्बेयं, पिताऽयं सर्वशक्तिमान्।
स्वाहाऽग्नी जयतो नित्यं मदेकसुतवत्सलौ ॥ १८६ ॥
द्रवन्मनाः स्खलद्वाणिर्धृताञ्जलिपुटो लुठन्।
पितरौ क्षमयन् दोषान् पतामि श्रीपदद्वये ॥१८७॥
प्रसीद भगवत्यम्ब ! प्रसीद भगवन् ! पितः।
पूर्णा शान्तिः प्रसरतु, पूर्णा स्थितिरुदीयताम् ॥१८८॥

अनयोरेव स्वाहाऽग्निदेवयोर्वृत्ति–ब्रह्मस्वरूपयोराराधन–प्रतिपादन-पूर्वकं कविनाऽस्मिन्नुत्तरभागे मूलतो जीवात्मनः पुत्ररूपस्य मातृरूपिण्याः शम–सन्तोष–सत्सङ्ग–सद्विचारात्मक–फलसेवनेन सन्तुष्टायाः सम्पुष्टायाश्च वृत्तेर्माध्यमात् पूर्णत्वप्राप्तये, पितृरूप–परब्रह्मप्राप्तये यद्वा सत्य–शिव-सुन्दरस्वरूप–सच्चिदानन्दलाभाय शास्त्रसम्मतो यत्रापथः प्रदर्शितो निजत्व-पूर्णां नानाशैलीं समाश्रित्य, वशिष्ठादिनिर्दिष्टां विविधदृष्टिञ्चाऽङ्गीकृत्य। इत्थं परमार्थचिन्तनप्रसङ्गे विशेषतो मातापित्रोः पुत्रस्य च पारिवारिक–रूपकोपस्थापनं तथाऽऽत्मनोऽग्निहोत्रकर्मसम्बद्ध–स्वाहाऽग्निसन्दर्भप्रदानञ्च कवेर्नितरां निजत्वपूर्णं मौलिकं वा कला–कौशलमत्र दृश्यते। सामान्यदृष्ट्या स्वाहाऽग्निदेवस्तुतिरिव दृश्यमाना कवेरियमभिव्यक्तिः सूक्ष्मदृष्ट्या तु न केवलं कान्तपदावलिसम्वलिता, सालङ्कारा सारगर्भिता तथा चिन्तनपरा एव, अपितु भावपूर्णा, प्रभावपूर्णा, प्रवाहपूर्णा चाऽनुभूयते।

कवेरनुभूतिः कियती तीव्रतरा, अग्निदेवप्रार्थनाप्रसङ्गादुद्धृतेषु निम्नाङ्कितपद्येषु दृष्टान्तरूपेषु स्वयमेवाऽनुभूयताम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जले तेजसि वायौ वा भुवि व्योमनि सर्वतः ।
तव स्फूर्तिमयी सत्ता, विलक्षण-चमत्कृतिः ।।१७।।
वेदो वेद न वा वेद, जातवेदः स्वयं वद ।
अवेद्योऽपि स्ववेद्योऽसि, त्वं विलक्षण-लक्षणः ।।२३।।
ॐकारः सर्वतन्त्राणां, हुँ-कारो धनिमनिनाम् ।
अहङ्कारः प्रमातॄणां, फुं-कारो विषधारिणाम् ।।२५।।
सूत्रधारः प्रणेतॄणां, कर्णधारो भवाम्बुधेः ।
रामाकारो मुमूर्षूणां, सुधासारो जिजीविषोः ।।२६।।
शान्ताकारः प्रसन्नानां द्वेषाकारो वृथाद्विषाम् ।
प्रसीद परिपूर्णात्मन् ! कृपया देहि दर्शनम् ।।२७।।

इत्यादिः ।

कविरग्निदेवस्य तृप्तये चेत्यात्मकं वासनाबीजरूपञ्च हव्यं जुहोति समर्पयति वा, यथा-

वीतिहोत्र ! मदीयेऽस्मिन् मानसे मन्दिरे वस ।
जुहोमि चेत्यं, त्वं तृप्येः, स्यान्ममाऽपि कृतार्थता ।।५०।।
हव्यभुग् ! वासनाबीजं हव्यं तुभ्यं समर्पितम् ।
गृहाण, भुङ्क्ष्व तत्सर्वं मोदमग्नेन चेतसा ।।५९।।

विषय-वासनाविषये कवेरुक्तिरतीव मार्मिकी, विस्तरविधानञ्चाऽत्र उल्लेखनीयम्, यथा-

असह्यं न विषं नाथ ! यथा विषय-वासना ।
एकेन क्षणिकं कष्टं, दुरन्ता यातनाऽन्यया ।।५८।।
काण्डात् काण्डात् प्ररोहन्ती दूर्वा-दुर्वासनालता ।
स्वल्पाऽपि प्रसरत्याशु, कच्चरे चित्त- चत्वरे ।।७२।।
स्पर्शमात्राद् अलर्कस्य विषेण हन्यते तनुः ।
विनाऽपि स्पर्शं स्मृत्यैव विषयेण तु निर्वृतिः ।।९१।।

इत्थमेव कामनाविषयेऽपि कवेरनुभूतिस्तीव्रतरा, रूपकयोजना तु अत्रत्यमतिरिक्तं वैशिष्ट्यञ्च, यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एका गता पराऽऽयासा, पुनरन्या गतेतरा ।
पुरतः पुनरायाति कामना-नाम-राक्षसी ।।६४।।
कामना-मर्कटी चित्त-कानने विषयैर्घने ।
इतस्ततो यत्रकुत्र वेगादुप्लवते क्षणात् ।।६६।।

इत्यादिः ।

उपरिचर्चितस्य साक्षिस्वरूपस्य परमात्मनः साक्षिचेतनस्य वा स्वरूपमपि १३५ श्लोकाद् इतो जडचेतनयोर्भेदप्रदर्शनपूर्वकं सम्यग् विवेचयन् कविरन्तत इत्थं प्रतिपादयति-

अव्यक्ताद् व्यक्तपर्यन्तं जडं देहेन्द्रियादिकम् ।
यद्भासाभासितं सर्वं, सैष साक्षी प्रकाशकः ।।१४१।।
पूर्वं परम् अभावं यं मध्यं भावं तथान्तरम् ।
साक्षात्करोति यः साक्षात्, स साक्षात् साक्षिचेतनः ।।१४२।।

इत्यादिः ।

एवं विभावसुं परमात्मरूपं प्रतिपादयन्-प्रार्थयन् अन्ततोगत्वा कविरात्मनाऽऽत्मानमेव तस्मै समर्पयति - एषा तु चरमोत्कर्षस्थितिर्भावनायाश्चिन्तनायाश्च । यथा-

गौतम-वंश्यः सैष गणेशः
प्रार्थयते त्वां हे जगदीश ! ।
स्वं स्वयमद्यैवाऽर्पयतीह,
पूरण ! पूर्णात् पूरय पूर्णम् ।।१९४।।

अतः परं ग्रन्थोऽयं समाप्तिमनुसरति । समाप्तिश्चाऽस्य विभावसुप्रार्थनापरकेणैव पद्यद्वयेन भवति, यत्र कविर्विभावसोः सच्चिदानन्दात्मकत्वं सत्यशिव-सुन्दरस्वरूपत्वञ्च सन्दर्शयति । इत्थमस्योत्तरभागस्य यतः प्रारम्भस्तत्रैव विभावसौ परिसमाप्तिर्दृश्यते । इदं समीचीनमेव, किमिति चेत्परमार्थतोऽयं विभावसुः परमात्मा परब्रह्मैव समस्तविश्वब्रह्माण्डानामपि प्रारम्भस्थलं विश्रामस्थलञ्च । ग्रन्थस्याऽस्य सन्देशसारोऽपि अयमेव । संक्षेपे,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रपञ्चाऽप्रपञ्चप्रकाशात्मकश्चिन्तनप्रधानोऽयं काव्यग्रन्थो लघुकलेवरोऽपि सर्वथाऽनुशीलनीयस्तथाऽनेन प्रतिपादितं वस्तुतत्त्वं मुहुर्मुहुर्मननीयं स्वानुभवे चाऽऽनयनीयमिति सविनयं निवेदयामि ।

अन्ततः कवेर्जीवनीविषये साहित्यसन्दर्भितसाधनाविषये चातिसंक्षेपे द्वित्रान् शब्दानग्रे सारयामि ।

काष्ठमण्डपान्तर्गत–राजराजेश्वरी–(देवपत्तन)–स्थराष्ट्रियाऽग्निहोत्र-शालानिवासिनोऽग्निहोत्रिमहोदयस्य प्रस्तुतकृतिकारस्य जन्म १९८२ विक्रमशरद आश्विनशुक्लमहानवम्यां, वाग्मत्यञ्चलस्य धादिङजिल्लान्तर्गते जीवनपुराभिधाने ग्रामेऽभवत् । पिता तथा माता अग्निहोत्री श्रीटङ्गनाथ गौतमस्तथा पवित्रादेवी (ग्रन्थस्याऽस्योत्तरभागे १९४–९६ श्लोकत्रये कविना स्वयमपि आत्मनः मातुः पितुश्च नाम्नोल्लेखो विहितो वर्तते) । शिक्षा वेदान्तशास्त्री । कृतिस्तु 'पुरुषार्थ'– पत्रिकायामन्यापेक्षया बाहुल्येनाऽत्रभवतो नेपालि–पद्यकविता मुद्रिताः सन्ति । अन्या नेपालि कृतयस्तु 'अरुणोदय' इत्यादिपत्रिकायां विकीर्णा दृश्यन्ते । 'जयतु संस्कृतम्'–संस्कृतपत्रिकायामत्र भवतः कतिपया मार्मिकाश्चिन्तनप्रधानाश्च लघुकथास्तथा अन्याः पद्यकविताश्च प्रकाशिता प्राप्यन्ते ।

अत्रभवता २००६ वैक्रमाब्दे समसामयिकक्रान्तिवातावरणस्य प्रेरणा-प्रभावाभ्यां विरचितो जननी–जन्मभूमि-नेपालेन स्वात्मजं नवयुवकं नेपालिनं संबोध्य प्ररणार्थं प्रदत्तः सन्देशरूपेणाऽवस्थितः 'मातृसन्देशः' लघुकायोऽपि (षट्–स्फुलिङ्गेषु विभक्तेऽस्मिन् काव्यग्रन्थे प्रथमे स्फुलिङ्गे सन्ति श्लोकाः १५, द्वितीये १५, तृतीये १५, चतुर्थे १५, पञ्चमे १७ तथाऽन्तिमे तु २१ श्लोकाः । छन्दःप्रयोगश्चाऽत्र विविधो दृश्यते ।) देशभक्तेस्तथा स्वातन्त्र्यप्रेम्णश्चाऽनुपमसन्देशाभिव्यक्तिप्रदानेऽतीव प्रभावशाली इतोऽपि अस्मिन् राजनीति-भागस्य कवितास्तु नितरां महत्त्वपूर्णाः सारगर्भिताश्चेति मेऽनुभूतिः । दृष्टान्तार्थं द्वित्राः श्लोका अत्रोद्धृताः सन्ति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकतः सुत ! समाजकुरीतिः अन्यतो नवयुवामृतकल्पः ।
एष एव मम पूर्णविषादः, त्वां निनीषति किल स्वसमाजम् ।।

(प्रथमस्फुलिङ्गः श्लो० १५)

हन्त ! हन्त!! तनय! स्वसमाजं, 'पक्क-पक्क' मुखमण्डलभाजम् ।
किं न पश्यसि ? कथं धृतनेत्रो ? व्यर्थमेव धरणी धरति त्वाम् ।।

(द्वितीयस्फु० ८)

धर्म-मर्म हृदयं गमयस्व, सत्य-धौतहृदयं च जुषस्व ।
अन्धदर्शितदिशैव न गच्छ, स्वीय-बुद्धि-नयनेन च पश्य ।।'

(तृतीयस्फु० ७)

योग्यतैव महतीं महनीयाम् आदधाति पदवीं न तु जन्म ।
पङ्किलस्थलरुहं कमलं यद्, देवमूर्ध्नि न च कैतक-पुष्पम् ।।
आसुरालय-निषादगृहान्तं द्योतते रवि-सुधाकरकान्तिः ।
पक्षपातविमुखो समभावो विश्वबान्धवतां प्रकृतिः सा ।।

(चतुर्थस्फु० ३,९)

यस्मिन् राज्ये न नयसमता नो च शिक्षा-प्रबन्धः,
आर्ता लोका उदरभरणे पीडिताः शोषकेभ्यः ।
नित्यं 'बर्-बर्'-नयनपयसा मृत्युमाराधयन्ति,
नो तद् राज्यं न च यमपुरं वत्स ! किं तन्न वेद्मि ।।

(पंचमस्फु० १)

यत्र द्यूतं तनय ! मदिरापान-वेश्याविलासा,
उत्कोचार्थैः प्रथितविभवा तुन्दिला राजनीतिः ।
निष्कर्माणोऽखिलधनिगणाः शोषणस्यावताराः,
तद्राज्ये किं क्षणमपि वसेत् ? सोन्नतिः शान्तिदेवी ।।

(पंचमस्फु० ४)

नयते विविधान् विषयान् हृदयं, मनुजो मृगतृष्णिकया विकलम् ।
परिणामसुखं न च संस्फुरितं निजबोधमयं चितिरूपमिदम् ।।

(षष्ठः स्फु० ५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटवज्जनतातनुरभ्र सुत ! जलवद् दहरं हृदुपाधि नभः ।
रविबिम्बसमश्चितिबिम्ब इह प्रतिबिम्बित आत्मज जीव इति ।।

(षष्ठः स्फु० १३)

इत्यमवलोकने 'प्रपञ्चाऽप्रपञ्चप्रकाश'-स्य पूर्वसमीक्षितस्य बीजात्मकम्-अङ्कुरात्मकं स्फुरणं 'मातृ-सन्देश'-स्य उपर्य्युद्धृतेष्वपि पद्येषु प्राप्यते। अस्तु एवं, कविनाऽयं 'मातृसन्देशः' नाऽद्यापि प्रकाशपथमानीतः । किमस्य कारणम् ? नाऽहं जानामि । अहन्तु यथाशीघ्रमस्य प्रकाशनार्थं कविमाह्वयामि ।

उपर्य्युल्लिखितानां प्रकाशिताप्रकाशितानां कृतीनां समयचक्रनिरूपणात् सुदीर्घसमयादेवाऽत्रभवतो गणेशप्रसादगौतममहोदयस्य साहित्यसाधनानुष्ठानं स्वत एव दृश्यते । प्रस्तुतस्य 'प्रपञ्चाऽप्रपञ्चप्रकाश'-स्य पृष्ठभूमौ अत्रभवतः पूर्वसाधनाऽपि इयमेव ।

अथ, २०३१ विक्रमवर्षस्य मार्गमासे श्रीमहेश-महर्षेः शुभागमनावसरे पशुपतिस्थ-वेदविद्याश्रमे समायोजितायां नेपालान्तरात्मपरिचायिकायां कवितागोष्ठ्यामत्रभवता श्रावितं पद्यमेकं प्रस्तुवन् ग्रन्थपरिचयात्मिकामिमां भूमिकामत्रैव विश्रामयामि—

निगमागम-विद्यानां यो बिन्दुः प्रणवोपरि ।
नेपालस्याऽन्तरात्माऽयं सोऽक्षरश्चन्द्रशेखरः ।।

कुमारबहादुरः जोशी
सह-प्राध्यापकः
त्रिभुवनविश्वविद्यालयस्य
नेपालस्थस्य

श्रावणसङ्क्रान्तिः, २०३८ विक्रमशरदः
चावहिलबजारः, काष्ठमण्डपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चिन्निवेदनम्

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते" इति स्मरन् ।।

–१–

पतामि गुरुगोपाल–पूज्यश्रीचरणद्वये ।
शोधयन् मलविक्षेपान्, स्वमात्मानं तमाश्रये ।।

–२–

यथावसरसंयोगं श्रीमद्भैरवशर्मणाम् ।
सत्प्रेरणाप्रभावाभ्यां प्रेरितेन यदा कदा ।।

–३–

सत्सङ्गवाटिका–पुष्पं श्रद्धयाऽवचितं मया ।
समर्प्यतेऽग्निदेवाय गुरवे परमात्मने ।।

–४–

मा ब्रूत् प्रयोजनं स्वस्य, तथाप्यन्यस्य तुष्टये ।
तुच्छं चापि सश्रद्धं यन् महते रोचतेऽर्पितम् ।।

–५–

अयोऽप्योऽपि भवेद् योग्यो, योग्ययोग–प्रभावतः ।
स्पर्शस्य स्पर्शमात्रेण, लोहोऽपि कनकायते ।।

–६–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्योपान्ताऽवलोकेन 'किञ्चिन्मन्तव्यं'—मात्मनः ।
पुरः संस्थाप्य येनेयं, पुस्तिका मे समादृता ।।

—७—

प्रतिभा—वारिधे रत्नं, वाग्देव्याः सक्तं वरम् ।
व्यनक्मि धन्यतां पूर्णप्रसाद—'ब्राह्मणं' प्रति ।।

—८—

विभिन्नां दृष्टिमाश्रित्य, विविच्य स्व—प्रकारतः ।
विशदीकृत्य विषयान्, संदर्भः स्वाशयानपि ।।

—९—

ग्रन्थस्याऽस्य प्रयत्नेन लिखन्तं भूमिकां निजाम् ।
विद्या—विद्योतित—स्वान्तं शान्तं विनय—मन्दिरम् ।।

—१०—

'जोशी'—महोदयं हार्दैर्धन्यवादैः युगंयुगैः ।
भूयो भूयोऽभिनन्दामि श्रीकुमारबहादुरम् ।।

—११—

आस्था—बिम्बं स्वधर्मस्य, निष्ठा—स्तम्भं स्वसंकृतेः ।
सेवा—स्कन्धं समाजस्य, निर्दम्भं चान्तरस्थितेः ।।

—१२—

सहस्रशोऽभिनन्दामि धन्यवादपुरःसरम् ।
हरिप्रसाद—पौडेलं प्रकाशे सहयोगिनम् ।।

—१३—

मुद्रणेऽशुद्धि—शोधेन सुश्रान्तं 'श्रमजीविनम्' ।
स्नेहाऽम्भसाऽभिषिञ्चामि बलरामं सुहृद्वरम् ।।

—१४—

× × ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असह्यवेदनोद्विग्नो, विक्षिप्तः, सान्निपातिकः ।
किं करोति, किमाचष्टे, नार्भवत्ता क्रियोक्तिषु ॥

–१५–

नाक्षेप एष कस्यापि, दुःख-विस्फोट आत्मनः ।
काकतालीय–योगोऽयं, कस्मिंश्चिद् घटते यदि ॥

–१६–

एवं धियाऽवधानं स्याद्, इति संप्रार्थयन्, नमन् ।
क्षमा–मिक्षामिहं याचे क्षमासिन्धुषु बन्धुषु ॥

–१७–

× × ×

प्रसादमिव वासिष्ठं शमसन्तोषणादिकम् ।
मूर्ध्नैव धृतवानस्मि, सादरं श्रद्धयाऽन्वितः ॥

–१८–

आद्यश्रीशङ्कराचार्याः शिवरामपुरःसराः ।
श्रद्धयैव सकृत् क्वाऽपि मयाऽत्र स्वागतीकृताः ॥

–१९–

पुनरुक्तिरिवाऽऽभाति स्थाने स्थाने मुहुर्मुहुः ।
जानताऽपि मया न्यस्ता, दार्ढ्यायाऽभ्यसनाय च ॥

–२०–

उपकुर्यान् न वा काँश्चिद्!, कस्मैचिद् रोचतां न वा!।
जात्विदं नाऽपकुर्वीत, तदा मे सफलः श्रमः ॥

–२१–

विभावसु–प्रसादेन प्रसीदत्येव मानसम् ।
चन्द्रोदय–प्रभावेण गङ्गाम्भ इव शारदम् ॥

–२२–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातुः संस्कृत-वाग्देव्या जन्मभूमेश्च संततम् ।
स्वच्छादर्शमयी सेवा नाल्पस्य तपसः फलम् ।।

-२३-

क्षमैकधनधन्येषु मूर्धन्येषु मनोजिताम् ।
मणेशः क्षमथत्येष उच्चावचमिदं मुहुः ।।

-२४-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ

प्रपञ्चाप्रपञ्च-प्रकाशः

पूर्वभागः

(प्रपञ्चात्मकः)

कल्पेत्त यः समुद्धर्तुं, सोऽथवा मादृशोऽथवा ।
शृणुयाज्जीवनी-गाथा, व्यथते व्यथयाऽन्यथा ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

तृष्णे ! देवि ! नमस्तुभ्यं लोकोत्तर-चमत्कृते ! ।
चकितं तव लीलाङ्ग-विक्षेपाद् भुवनत्रयम् ॥
(१)
विजयस्व महाशक्ते ! सर्वान्तस्तल-चारिणि ! ।
आत्मनो जीवनीगाथा-प्रपञ्चोऽद्य प्रपञ्च्यते ॥
(२)
सुप्रसीद महामाये ! प्रेरणाभिः प्रचोदितः ।
प्रस्तौमि ते प्रसादाय, श्रुतदृष्टाऽनुभूतिभिः ॥
(३)
'च्यै'-कारेण समाह्वानं, 'धर्-धत्'-कारेण भर्त्सनम् ।
विधूननाद् अगुच्छस्य पुच्छस्य प्रभु-तोषणम् ॥
(४)
यत्र तत्र च सर्वत्र, वर्तनं च प्रवर्तनम् ।
मन्ये श्व-जीवनं धन्यम्, अदृष्टं शर्ममर्मभिः ॥
(५)
घोणया जिघ्रतः 'सूँ-सूँ' चक्षुर्भंग्याऽभिपश्यतः ।
'च्यै'-काराकृष्टकर्णस्य, धन्येयं मे श्वजीवनी ! ॥
(६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्दिश्य ग्रहभूतादीन्, पथि क्षिप्तान दशाक्षतान् ।
अन्वेषयत आजन्म, धन्येयं मे श्वजीवनी ! ॥

(७)

अहं पूर्वमहं पूर्वमितीर्ष्यावेशवेगतः ।
उच्छानुच्छत उच्छिष्टान्, धन्येयं मे श्वजीवनी ! ॥

(८)

प्रतिदातृ प्रतिद्वारं, तिष्ठतो सौनमुद्रया ।
बुक्कतो दुर्बलान् दृष्ट्वा, धन्येयं मे श्वजीवनी ! ॥

(९)

बलवन्तं विलोक्यैव, 'ह्याँ ! ह्याँ'-ति स्वरभङ्गतः ।
असकृन् 'डिच्च-डिच्चे'-ति दंष्ट्रा दर्शयतः सतः ॥

(१०)

नीचैः कुञ्चित्-पुच्छस्य, तत्क्षणोत्थित-वेपथोः ।
'घ्यार्-घ्यार्' निःश्वसतः सोष्णं धन्येयं मे श्वजीवनी ! ॥

(११)

सृक्किणी लिहतोऽभीक्ष्णं लालाप्लावितजिह्वया ।
प्रभुं प्रभु प्रार्थयतो धन्येयं मे श्वजीवनी ! ॥

(१२)

प्रतिग्रह-मलप्राप्त्यै, मिथो रोषेण गर्जतः ।
जनान्तरं समुल्लङ्घ्य, दातारं चोपसर्पतः ॥

(१३)

दुष्पूरोदर-गर्तस्य पूत्यै सर्वत्र यत्नतः ।
अलज्जं याचमानस्य, धन्येयं मे श्वजीवनी ! ॥

(१४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरासनै र्निरशनैः, पुरस्कृततिरस्कृतेः ।
लालाटिकस्य भूयोऽपि, धन्येयं मे श्वजीवनी ! ॥

(१५)

स्खलतो धावमानस्य, ग्रामाद् ग्रामं, पुरात् पुरम् ।
वेगेनोच्छ्वसतः 'स्याँ! स्याँ!' धन्येयं मे श्वजीवनी ! ॥

(१६)

यत्र कुत्र कचित् किञ्चित् कथञ्चित् किमहं लभे ।
इत्याशा-पाशबद्धस्य, धन्येयं मे श्वजीवनी ! ॥

(१७)

सौभाग्यात् प्रेतपिण्डानां दर्शनादेव तुष्यतः ।
लिप्सया सृजतो लालां, धन्येयं मे श्वजीवनी ! ॥

(१८)

अहो ! अदूमरता-व्याधिव्याप्तस्य विह्वलात्मनः ।
दुःखदावेन दग्धस्य, धन्येयं मे श्वजीवनी ! ॥

(१९)

आशा-पिशाचीग्रस्तस्य त्रस्तस्य विह्वलाऽऽकृतेः ।
क्रन्दतः कूर्दमानस्य, धन्येयं मे श्वजीवनी ! ॥

(२०)

दैवानुकूल्यात् संप्राप्ते सत्यप्युच्छिष्टभोजने ।
स्मरतः पौर्वजं पुण्यं, धन्येयं मे श्वजीवनी ! ॥

(२१)

परप्रदत्त-पिण्डेन स्वं पिचण्डं पिपूर्षतः ।
अहं-मन्यस्य गण्यस्य, धन्येयं मे श्वजीवनी ! ॥

(२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुत्रुवैः प्रहस्तेन, लत्तया, यष्टि-मुष्टिभिः ।
हतस्याऽप्यनुयातस्य, धन्येयं मे श्वजीवनी ! ॥

(२३)

दंष्ट्रा दर्शयतो दीर्घा, निःशब्दं प्रेतभूमिषु ।
हसिता अस्थिराजीवद्, धन्येयं मे श्वजीवनी ! ॥

(२४)

अस्तव्यस्त-स्थितिस्थस्य, स्थितिं स्थापयतः सतः ।
भ्रष्टस्य सर्वतो हन्त ! धन्येयं मे श्वजीवनी ! ॥

(२५)

नवग्रह-नवद्वारे, दशमत्वेन तिष्ठतः ।
तैरप्यपूर्वदृष्टस्य, धन्येयं मे श्वजीवनी ! ॥

(२६)

दशाशासु दशाशाभि र्दशाशंसो र्दशावतः ।
साक्षाद् दशावतारस्य, धन्येयं मे श्वजीवनी ! ॥

(२७)

पीडयन्ति ग्रहा जातु, क्वचित् कतिपयै र्दिनैः ।
अतिग्रहस्य नव्यस्य धन्येयं मे श्वजीवनी ! ॥

(२८)

दीक्षितैर्दीक्षितस्यापि, शिक्षितैः शिक्षितस्य च ।
याच्ञादम्भैकलक्ष्यस्य धन्येयं मे श्वजीवनी ! ॥

(२९)

तृष्णे ! देवि ! नमस्तुभ्यं, नमस्तुभ्यं नमो नमः ।
तव प्राप्तप्रसादस्य, धन्येयं मे श्वजीवनी ! ।

(३०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यल्पायामपि प्राप्त्यां, पारेकोटि शुभाशिषः ।
'कुई'! कुई'!!'स्व-भाषाभि र्निःसंकोचं प्रयच्छतः ॥
(३१)

प्रहस्तादि-प्रहारेण विहस्तस्याऽप्यहो ! स्वयम् ।
सर्वं विस्मरतः पूर्वं, परं च नानुशोचतः ॥
(३२)

जातु हर्षेण हसतो जातु दुःखाश्रु मुञ्चतः ।
जातूर्ध्वं जात्वधः स्थास्नो स्तरङ्गिण्यास्तरङ्गवत् ॥
(३३)

केवलं वर्तमाने हि, वर्तमानस्य दुर्मतेः ।
अदूरदर्शिनो धन्या ! धन्येयं मे श्वजीवनी ! ॥
(३४)

तृष्णे देवि ! नमस्तुभ्यं, भ्रमद्भ्रमिगरीयसि ! ।
प्राणप्रिये ! प्राणवतां, वरीयसि ! वरीयसाम् ॥
(३५)

त्वन्मायाजालजटिला कुटिला कुलटेव या ।
विवेकविकला बुद्धिः श्रेयसे नेह कल्पते ॥
(३६)

ग्रसितस्योज्झितस्यापि गुप्तदन्तै र्महात्मभिः ।
न तिष्ठतो न चलतो धन्येयं मे श्वजीवनी ! ॥
(३७)

आगलं भुक्तमुक्तस्य त्यागिरागिविरागिभिः ।
न जीवतो नाप्तमृत्यो र्धन्येयं मे श्वजीवनी ! ॥
(३८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकण्ठं प्राणिनां प्राणा यियासव इतोऽन्यतः ।
भवन्तु, किन्तु हे तृष्णे ! त्वमेका न जिहाससि ॥
(३६)

असमर्थस्य यद्ज्ञानं, तद् दुःखायैव कल्पते ।
प्राक् सामर्थ्य-बलं वीक्ष्य, कुर्वन्ति कृतिनः कृतिम् ॥
(४०)

अविचार्य निजां शक्तिं नाननननिरीक्षिणः ।
दुःखाब्धौ पततो वेगाद्, धन्येयं मे श्वजीवनी ! ॥
(४१)

भृगोश्चिन्हैरभिन्नस्य सतोऽपि भिन्नवक्षसः।
पातात् पादाद्, विभिन्नस्य धन्येयं मे श्वजीवनी ! ॥
(४२)

लौहचित्ताऽसि-कृत्तस्य, प्रारब्धाऽनुज-सज्जनैः ।
हिक्काहिक्किकतक-एठस्य, धन्येयं मे श्वजीवनी ! ॥
(४३)

मायामनुप्रयातः सन् स - ह-रामः स्त्रिया बलैः ।
हन्मीत्याह्वयते यो मां, धन्येयं मे श्वजीवनी ! ॥
(४४)

बद्धमुष्टे ज्वलद्दृष्टे र्दयादृष्टिश्च कीदृशी ? ॥
हन्त ! जातु भवेद् यद्वा, न भवेत् साप्यनिश्चिता ॥
(४५)

वामप्यपेक्षमाणस्य, कल्पितां कल्पनामिव ।
प्राज्ञ-मूर्धन्य-धन्यस्य, धन्येयं मे श्वजीवनी ! ॥
(४६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परममौनभिज्ञस्य, भस्त्रावच्छ्वसतः सतः ।
जीवन्मृतस्य निर्बुद्धे, धन्येयं मे श्वजीवनी ! ॥
(४७)

वेदनापूर्ण-विनयाद् दधीच्यस्थि, शिला, पविः ।
जातु द्रवेन् न चाश्चर्यं, न जात्वधम-मानसम् ॥
(४८)

स्थाने विजयते सत्यम्, विनयः सूनृतोऽपि सन् ।
अधमे कल्पितस्त्वेष, तप्ते तैले जलायते ॥
(४९)

पयःपानं भुजङ्गानां, केवलं विषवर्धनम् ।
न वदन्ति वृथा सन्तोऽनुभूतं तन्मया मुहुः ॥
(५०)

न स्वर्गे नापि भूगर्भे, न मृत्यौ न च जीवने ।
त्रिशङ्कुस्थान-निष्ठस्य, धन्येयं मे श्वजीवनी ! ॥
(५१)

जय तृष्णे ! भगवति ! सर्वथा पुरतस्तव ।
अस्त्येव क्रीतदासोऽयं, यथेच्छं कुरु, कारय ! ॥
(५२)

विजयस्व महामाये ! ब्रह्माण्डानां नियामिके ! ।
मृत्युञ्जयो निगडितस्त्वयाऽन्येषां तु का कथा ? ॥
(५३)

तृष्णे ! देवि ! नमस्तुभ्यं, न वयं विस्मयामहे ।
विस्मयन्तां, तवेयत्तां क्षीप्सवो बुद्धिशालिनः ॥
(५४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौभाग्यपूर्ण-जीवन्या भूयः शृणु शुभाः कथाः।
गायामि ते प्रसक्त्यर्थं, मूर्च्छना भावभङ्गिभिः॥
(५५)

श्व-वृत्तिं सेवमानस्य, स्ववृत्तिं परिमुञ्चतः।
फटाटोपस्य महतो धन्येयं मे श्वजीवनी!॥
(५६)

कार्तिकेन समाः मासा, ऋतुनापि समे समाः।
समपर्वतिथे हन्त! धन्येयं मे श्वजीवनी!॥
(५७)

मुखेन रटतो राम मटतो दम्भभूमिषु।
धर्मध्वजं समुत्तोल्य, धन्येयं मे श्वजीवनी!॥
(५८)

चक्रत्रिशूलाऽऽकलितभाल-दोर्दण्ड-वक्षसः।
गृहीत-दम्भदण्डस्य, धन्येयं मे श्वजीवनी!॥
(५९)

स्थितं तपो जटाऽटव्यां, दाढिकायां, पटे, मठे।
द्रष्टुर्दृष्टे र्विलुप्तस्य, धन्येयं मे श्वजीवनी!॥
(६०)

भाले भूति र्गले मालाश्चन्द्रशालाः स्थले स्थले।
कामं सन्तु, सदा ऽऽ शंसो धन्येयं मे श्वजीवनी!॥
(६१)

ध्यानस्तिमितनेत्रस्य, बकमुद्रानुकारिणः।
बिडालव्रतराजस्य, धन्येयं मे श्वजीवनी!॥
(६२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यही रामावतारस्य, स्वान्ता रावण-रूपिणः ।
कालनेमिगुरो रस्य, धन्येयं मे श्वजीवनी ! ॥

(६३)

हृदि रागो, मुखे त्याग स्तद्योगः कर्मकौशलम् ।
एतन्निष्ठ-वशिष्ठस्य, धन्येयं मे श्वजीवनी ! ॥

(६४)

क्षमाऽशक्तौ स्थिता तूष्णीं, जपः कर्णेजपे स्थितः ।
स्थिता श्रीमत्पदे निष्ठा, मन्त्रोऽपि श्रीमतीक्षणे ॥

(६५)

सुरालये स्थितं शीलं, त्यागो मूत्रपुरीषयोः ।
शिक्षा विज्ञानगर्भस्था, दीक्षा क्वापि पलायिता ॥

(६६)

तृष्णे ! देवि ! नमस्तुभ्यम्, अव्याहतमनोरथे ! ।
क्रीडा-कन्दुकवन्नित्यं, तवाऽधीनं चराचरम् ॥

(६७)

मुण्डनै र्यतिभिक्षूणां, जटाजूटैस्तपस्विनाम् ।
विरागाणां त्रिशूलेन, त्रिपुण्ड्रेण द्विजन्मनाम् ॥

(६८)

सदा दारैर्गृहस्थानां, भाषणै राष्ट्र-सेविनाम् ।
खण्डनैः कर्मकाण्डानां, प्रकाण्डब्रह्मवादिनाम् ॥

(६९)

मण्डनै र्भोगसुभगै र्भव्यै राकल्प - कल्पनैः ।
सभ्यातिसभ्य - वर्गाणां, महर्घत्वै र्विकासिनाम् ॥

(७०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यायिनोऽर्थानुसन्धानै र्यूनां वाक्यै निरर्गलैः ।
चित्तवृत्ते र्निरोधस्य, सर्वोच्चानन्द-सेवनैः ॥
(७१)

श्वोवादै र्न्यायपद्धत्यां, जीवनेनाऽधिवक्तरि ।
पारेजीवनमानन्दै र्नीरक्षीर - विवेचनैः ॥
(७२)

सर्वान् दिधीर्षतो योगान्, योग-चूडामणेः सतः ।
महत्त्वाकाङ्क्षिणो धन्या !, धन्येयं मे श्वजीवनी ! ॥
(७३)

दशदिक्षु विकासानां प्रकाशाः प्रसृता अहो ! ।
सभ्यनारी-समाजस्य विकीर्णा मूर्धजा इव ॥
(७४)

सद्वृत्तेन विहीनस्य, धृत-मुक्तकपद्धतेः ।
सम-सिद्धि-समानस्य, धन्येयं मे श्वजीवनी ! ॥
(७५)

विशालाशय-विन्यस्तां, बालसंन्यास-सन्निभाम् ।
मौक्तिकीं प्रगतिं प्रेप्सो र्धन्येयं मे श्वजीवनी ! ॥
(७६)

उल्लङ्घ्य नियमद्वारं प्रोत्प्लुत्याडम्बराम्बरे ।
कृतार्थमन्यमानस्य, धन्येयं मे श्वजीवनी ! ॥
(७७)

उद्यम्य तर्जनीं दीर्घां, धुन्वतः कीर्णकुन्तलान् ।
व्याख्यातुः स्वर्भुवोर्धीप्सो र्धन्येयं मे श्वजीवनी ! ॥
(७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरर्गलगलोद्वान्त - मदबर्वरया गिरा ।
घोषतः श्रुतिभेदिन्या धन्येयं मे श्वजीवनी ! ।।
(७६)
अरुद्राक्षस्य दहतो रुद्राक्ष-रुद्ररोचिषा ।
अनङ्गमिव हीनाङ्गं, धन्येयं मे श्वजीवनी ! ।।
(८०)
न जानतोऽपि कपिलं, दिधक्षोः कपिलार्चिषा ।
सागरानिव निःसत्त्वान्, धन्येयं मे श्वजीवनी ! ।।
(८१)
अधश्चोद्ध्वं विरूढाभिर्दंष्ट्रा-प्रख्यातिपङ्क्तिभिः ।
चर्वतो निर्दयं दीनान्, धन्येयं मे श्वजीवनी ! ।।
(८२)
स्वयं हि मोक्षमाणस्य, परानपि मुमुक्षतः ।
महान्तं मन्यमानस्य, बहिर्विस्मृत-संसृतेः ।।
(८३)
सर्वोच्चानन्द-धाराभिः स्वान्तः स्नातस्य धीमतः ।
देहाध्यास-विहीनस्य कृत्याऽकृत्यं न जानतः ।।
(८४)
निश्चेष्टं स्वपतो हन्त !, समदृष्टेः समस्थितेः ।
नव्योच्चनिर्विकल्पस्य, धन्येयं मे श्वजीवनी ! ।।
(८५)
पाश्चात्य-रसिकोद्वान्तं रसं पीत्वा बलीयसः ।
भूयोऽपि प्रतिवान्तेन, तेनापि पुष्टवक्षसः ।।
(८६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व-संस्कृति-सुधाधारां, तिक्तां हालाहलामिवोज्झतः ।
उपासकस्य प्रगते र्धन्येयं मे श्वजीवनी ! ॥
(८७)

पाश्चात्यभूमिकम्पेन, प्राच्यसंस्कृतिमन्दिरम् ।
छिन्नं, भिन्नं विदीर्णं च, खण्डशः खण्डशोऽभितः ॥
(८८)

स्याद्, नोद्विधीर्षतः,किन्तु सभ्यंमन्यस्य धीमतः ।
सुधारवाद-भक्तस्य, धन्येयं मे श्वजीवनी ! ॥
(८९)

तृष्णे ! देवि ! नमस्तुभ्यं, त्वयेयं सृष्टिमञ्जरी ।
तन्यते, हन्यते, हन्त !, लीलयैव विधीयते ॥
(९०)

अद्भुते ! भूतजातेषु, भवद्भूतेषु भाविषु ।
अन्तश्चरसि मौनेन, मौनिष्वपि यदृच्छया ॥
(९१)

कालः कवलयेत् कामं, साक्षाद् विश्वम्भरानपि ।
आस्तामेतत्, त्वया देवि ! प्रेरितः सन् स कल्पते ॥
(९२)

आस्तां सर्वं किमेतेन, कूप-ब्रह्माण्डमानिनः ।
जन्मान्धस्येव भेकस्य धन्येयं मे श्वजीवनी ! ॥
(९३)

तापैर्विवृततुण्डस्य, पापैः पूयप्रवाहिणः ।
जरा-जर्जरिताङ्गस्य, वलीपलित-चर्मणः ॥
(९४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नखदन्त-विहीनस्य, कङ्कालं दधतः सतः ।
तृष्णाऽवशिष्ट-प्राणस्य, धन्येयं मे श्वजीवनी ! ॥
(९५)

प्रगत्यां लम्बमानस्य दुर्गत्यां पततः सतः ।
किंकर्तव्य-विमूढस्य, धन्येयं मे श्वजीवनी ! ॥
(९६)

प्रतीपविधिनाऽधोऽधो गतिं नीतस्य दुर्गतेः ।
अन्तरा दुर्गतिं किं स्याद् !, धन्येयं मे श्वजीवनी ! ॥
(९७)

पदे पदे प्रस्खलतो भग्नपृष्ठस्य सर्पतः ।
खञ्जस्य पद्भ्यां द्विपदो, धन्येयं मे श्वजीवनी ! ॥
(९८)

अधमाद् दैवमपि यद् बिभेतीति, मृषा न तत् ।
अनुभूतं, मयाऽद्यैव परीक्षणधिया स्वयम् ॥
(९९)

परास्त - धुन्धुलीपुत्राऽजामिलाऽनेककोटिकम् ।
नदृष्टचरमत्युग्रं न च श्रुतचरं क्वचित् ॥
(१००)

दुरुद्धरं, दुराचारं, दुर्दर्शं, दुरतिक्रमम् ।
मां श्रुत्वैवाऽविलोक्यैव, देवा हन्त ! पलायिताः ॥
(१०१)

स्वयं त्रिपथगाऽशक्ता, निम्नगाऽभूद् भयद्रुताः ।
विष्णु भृंगोलमुत्क्षिप्तु र्न प्रभूष्णु र्द्रुतं द्रुतः ॥
(१०२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साकारा मूर्तयो हन्त ! प्रावसन् भयविह्वलाः ।
किमद्भुतं ! किमाश्चर्यं न भूतपूर्वमीदृशम् ! ॥

(१०३)

नातः परतरं किञ्चित्, खलूक्त्वा जीवनी-कथाः ।
जननी जन्मभूमिश्च, हतकेन हता ! हता !! ॥

(१०४)

अहोपुरुष ! पूर्णात्मन्न् ! आहोपुरुषिका ! क्व ते ।
पूर्णता सापि पूर्णा चेत्, समुद्धर दुरुद्धरम् ॥

(१०५)

अन्यै र्दुरुद्धरं जातु समुद्धरसि तर्हि ते ।
लोकोत्तरयशःकेतुस्तायते विजयोच्छ्रितः ॥

(१०६)

नो चेन् मिथ्याभिमानेन, मिथ्याचारेण कस्य किम् ?।
उपहासं, परीवादमन्तराऽन्यन् न किञ्चन ॥

(१०७)

दुर्धर्षे दुःखसंघर्षे, घृष्टं मां जगदीश्वर ! ।
अग्निदेव ! दयामूर्ते ! समुद्धर ! समुद्धर !! ॥

(१०८)

क्व प्रयाणि ! करवाणि किं ? प्रभो !,
दन्दहीति हृदयं दिवानिशम् ।
सर्वतोऽस्मि भगवन् ! निराश्रयः,
सर्वथा त्वमधुना ममाश्रयः॥

(१०९)

प्रपञ्चाप्रपञ्च-प्रकाशे
प्रपञ्चात्मकः पूर्वभागः समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ

प्रपञ्चाप्रपञ्च-प्रकाशः

उत्तरभागः

(पारमार्थिकः)

व्यलीक-गुणदोषाणां, स्तुत्या वा निन्दया च किम् ?।
सारमात्रं समीहन्ते, मधुपा इव सज्जनाः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ

विभावसु-प्रार्थनापुष्पम्

स्वधर्मस्य, स्वराष्ट्रस्य, स्वादर्शस्य, स्वसंस्कृतेः ।
उद्बोध-स्फूर्तये नित्यं, नमः पावक-मूर्तये ।।
(१)

भगवन्! सुमनोगुच्छ स्तुच्छोऽप्येष समर्प्यते ।
अक्षम्यश्चेद् भवेत् क्षम्यो रोचते चेत् प्ररोचताम् ।।
(२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ

सर्वाधारो निराधार एकोऽनेकेषु जृम्भितः ।
जयत्यानन्द साम्राज्य-सम्राड् देवो विभावसुः ॥
(१)

श्वास-प्रश्वासवद् यस्य, नीलोन्मेष-निमेषतः ।
आविर्भूता स्तिरोभूताः असकृत् कल्पकोटयः ॥
(२)

श्रेयसां हेतवे मेष-केतवे कालसेतवे ।
नमोऽखिलजुषे स्वस्मिन्, निस्तुषायाऽद्भुतत्विषे ॥
(३)

स्वविभूत्यैव पितरौ, स्वयं प्रकृति-पूरुषौ ।
वन्दे छाया-प्रकाशाभ्यां समौ स्वाहाहविर्भुजौ ॥
(४)

श्रेय - श्चकोरजीवातू इवाऽमू चन्द्रिका-विधू ।
जयतां जगतो हेतू सेतू स्वाहाविभावसू ॥
(५)

अविकथ्ये ! सदातथ्ये ! पथ्यापथ्य-पथोत्थिते ! ।
विजयस्वाऽऽवसथ्याग्नि-देवते ! वैश्वदेवते ! ॥
(६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयाऽलक्ष्यकलादक्षे ! सर्वरक्षण-सक्षणे ।
जय विश्व-गृहाध्यक्षे ! गार्हपत्याग्नि-देवते ! ॥

(७)

आहूयाहूय हूयन्ते सप्तसप्त्यादि-देवताः ।
जयत्वाऽऽहवनीयाग्नि-देवता देवताऽऽवृता ॥

(८)

ऋत्विजां दक्षिणादक्षे ! हव्यकव्यादि-दक्षिणे ! ।
विजयस्व दयामूर्ते ! दक्षिणाख्याग्नि - देवते ! ॥

(९)

विजयस्व विशालाक्षि ! चिद्रूपे ! साक्षि-देवते
जय मूलान्धतमस-ध्वंसनैक-दृढव्रते ! ॥

(१०)

चेत्यै रनाविले चित्ते यद्वा चेत्यै विवर्जिते ।
विजृम्भमाणा चिन्मूर्ति-स्फूर्ति स्तव विराजताम् ॥

(११)

आदिमध्यावसानानाम् अवसानम्, अनुत्तरम् ।
तदेव देव ! ते रूपं, येन विश्वं विजृम्भितम् ॥

(१२)

काम-प्रभञ्जनोद्भूते गाढे तमसि मूर्च्छिते ।
निवृत्तिवृत्ति-विच्छिन्ने साक्षी त्वं शरणं मयि ॥

(१३)

काममायान्तु वा यान्तु, वृत्तय स्ता अनेकधा ।
तासां द्रष्टाऽप्यसंस्पृष्टो निर्मल स्त्वं विलक्षणः ॥

(१४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समूल-मूलकोच्छेदम् इवोद्वेगं विभेदय ।
चिज्ज्वालासि-प्रहारेण, न स भूयः प्ररोहतु ॥

(१५)

वात्ययोड्डीयमानोऽपि, जगदाडम्बराम्बरे ॥
अविलुप्तदृशा दृष्टः, कथं न स्यां निराकुलः ? ॥

(१६)

जले तेजसि वायौ वा भुवि व्योमनि सर्वतः ॥
तव स्फूर्तिमयी सत्ता, विलक्षण-चमत्कृतिः ॥

(१७)

कामग्राह-ग्रहै ग्रस्ता, विषयाऽऽवर्त-विप्लवा ।
जगत्कल्लोलिनी-लीला, त्वत्प्रसादा ल्लवायते ॥

(१८)

आलम्बोऽपि निरालम्ब आश्रयोऽपि निराश्रयः ।
अविभिन्नोऽपि भिन्नोऽसि भगवंस्त्वं विलक्षणः ॥

(१९)

प्रपञ्च-रजसाऽस्पृष्टे पूर्णे जाग्रति चेतसि ।
स्पष्टं ते भाति रूपं स्वं, निर्मले दर्पणे यथा ॥

(२०)

सुषुप्तौ जागरे स्वप्ने, प्राज्ञे विश्वे च तैजसे ।
विभिन्नभान-भिन्नेऽपि साक्षी त्वमविकारवान् ॥

(२१)

द्रष्टृ-दर्शन-दृश्यादि, त्रिपुटीयं बलीयसी ।
तया शून्यमशून्यं यत्, तच्च वाचां विजृम्भणम् ॥

(२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेद्यो वेद्य न वा वेद्य, जातवेदः ! स्वयं वद ।
अवेद्योऽपि स्ववेद्योऽसि, त्वं विलक्षण-लक्षणः ॥
(२३)

विवेक – सूर्य-किरणैः प्रफुल्ले मानसाम्बुजे ।
चित्-सम्राड् ! राजहंस ! श्री स्तवोल्लसतु नृत्यतु ॥
(२४)

ॐ कारः सर्व-मन्त्राणां, हुँ-कारो धनिमानिनाम् ।
अहंकारः प्रमातृणां, फूं-कारो विष-धारिणाम् ॥
(२५)

सूत्रधारः प्रणेतृणां, कर्णधारो भवाम्बुधेः ।
रामाकारो मुमूर्षूणां, सुधासारो जिजीविषोः ॥
(२६)

शान्ताकारः प्रसन्नानां द्वेषाकारो वृथाद्विषाम् ।
प्रसीद परिपूर्णात्मन् ! कृपया देहि दर्शनम् ॥
(२७)

दुर्विभाव्यैः कर्मजालै र्जटिले जन्म-जङ्गले ।
अविश्रान्त्या चिराद् भ्रान्तं, श्रान्तं संभावय प्रभो ! ॥
(२८)

श्रोत्रादिकरणं स्व-स्व-शब्दादिविषयाद् मुहुः ।
उपसंहृत्य मनसि, तन्मन स्त्वयि साक्षिणि ॥
(२९)

स्थिरीकृत्यैकाग्रतया दीर्घकालमखण्डितम् ।
चिन्तनं ध्यानमित्याहु र्ध्यानतत्त्व–विशारदाः ॥
(३०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनैव ध्यानमार्गेण समाहितधियां स्वयम् ।
अहंमात्राऽनुभूतिं त्वां, पश्यन्ति ध्यानयोगिनः ॥
(३१)

सत्वं, रज स्तम इति गुणा दृश्या स्ततः पृथक् ।
तेषां व्यापार-साक्षी यो, नित्यो गुण-विलक्षणः ॥
(३२)

आत्मा योऽयं स एवाऽहम्, इत्यनुत्तरचिन्तनम् ।
ज्ञानयोगोऽयमेतेन, पश्यन्ति ज्ञानयोगिनः ॥
(३३)

त्वत्समर्पण-बुद्ध्याऽर्थाद्, निष्कामेन स्वकर्मणा ।
सस्वान्तः - शुद्धि-बोधेन, पश्यन्ति कर्मयोगिनः ॥
(३४)

जय जन्मज्वरज्वालादाह-शीतल-दीधिते ! ।
जय गाढान्धसंस्कार-विनाशोद्दीप्तदीधिते ! ॥
(३५)

जय काल-महाव्याल-विषदोष-रसायन ! ।
जय कामकलाऽरण्योन्मूलनाय प्रभञ्जन ! ॥
(३६)

जय बोध-महासिंह ! मोह-मातङ्ग-सूदन ! ।
जय ब्रह्माण्ड-भाण्डस्य प्रकाशक ! निरञ्जन ! ॥
(३७)

जय निर्मल ! निर्लेप ! निष्प्रपञ्च ! निराकृते ! ।
जय सम्राड् ! विराड् ! विभ्राट् ! स्वेच्छया विविधाकृते ! ॥
(३८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जय देव! सदाधार! दयादाक्षिण्य-सागर!।
जयाऽपारगुणागार! विचित्र-महिमाकर!॥
(३६)

जय हार्दतमोनाश-प्रचण्डकर-भास्कर!।
जय दुर्दैव-लिखित-ललाटलिपि-तस्कर!॥
(४०)

जय दुर्भावनाचण्ड-भुजङ्गम-भुजङ्गभुक्!।
जय दुष्कृत-भेकाऽऽशीविषाऽधीश्वर! हव्यभक्!॥
(४१)

जय विघ्न-घनोच्छेद-चण्डोच्चण्ड-सदागते!।
कालपाश-प्रणद्धानां मोक्षणाय धताऽऽकृते!॥
(४२)

जय केवल! सर्वात्मन्! निष्कलङ्क! निराकुल!।
जयाऽविकृत! चिन्मात्र! जय निष्क्रिय! निष्कल!॥
(४३)

जय निःसार-संसार-साराऽनर्घ्य-शिरोमणे!।
जय पूर्णपरानन्द-पयोनिधि-कलानिधे!॥
(४४)

जय शान्ति-सुधासार! प्रकृते र्विकृतेः पर!।
जयाऽव्याहत-संचार! वाचां बुद्धे रगोचर!॥
(४५)

जय वस्मर! विश्वेषां दुःख-हालहलाऽऽहुतेः।
अत्यद्भुत-चमत्कार! तथापि स्वस्थताऽऽकृतेः॥
(४६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवानुग्रह – गङ्गायाः कल्लोल – मधुरध्वनिः ।
भगवन् ! मे श्रुतिप्रान्ते सदोल्लसतु गुरुजतु ॥
(४७)

देवान् हव्यैः पितॄन् कव्यैः, सर्वान् प्रीणयसि स्वयम् ।
प्रीणय श्रीपदाम्भोज – सेवाऽमृत–रसैरिमम् ॥
(४८)

धूमध्वज ! स्वधूमेन धूर्तस्य विषयस्य तत् ।
चतुरं चक्षुराच्छाद्य तं च धूर्तं विपोथय ॥
(४९)

वीतिहोत्र ! मदीयेऽस्मिन् मानसे मन्दिरे वस ।
जुहोमि चेत्यं, त्वं तृप्येः, स्यान् ममापि कृतार्थता ।
(५०)

हव्यभुग् ! वासना–बीजं हव्यं तुभ्यं समर्पितम् ।
गृहाण, भुङ्क्ष्व तत्सर्वं, मोदमग्नेन चेतसा ॥
(५१)

अभिमान–धनैर्गुर्वीं दुर्वहां चित्त–पेटिकाम् ।
गृहाण मरणासन्न स्त्वयि न्यस्यामि सत्वमे ॥
(५२)

अविवेक–समुत्पन्नं दुरूहं मोहकाननम् ।
ज्वलन! ज्वलयाऽशेषं विवेक–ज्वाल–मालया ॥
(५३)

चन्द्रचूड– (!) दृशा देव ! मलीमस–मनोभवः ।
शान्तिकामोद्भटो विघ्नो भस्मशेषोऽवशिष्यताम् ॥
(५४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पदृप्तदृशाऽदृश्योऽस्पृश्यो दोर्दण्डताण्डवैः ।
हठात् कर्षति कामोऽन्तः, कालोऽसामयिको यथा ॥
(५५)

विषं मयाऽर्पितचरं, वितीर्णं मे त्वयाऽमृतम् ।
प्रत्युतोद्बाधतेऽशक्तं, पायय स्वकरेण माम ॥
(५६)

पातुं स्वयमशक्तं ता आपो दूरस्थिता स्तथा ।
न बाधन्ते यथा हन्त ! पुरस्था स्तृषितं जनम् ॥
(५७)

असह्यं न विषं नाथ ! यथा विषय-वासना ।
एकेन क्षणिकं कष्टं, दुरन्ता यातनाऽन्यया ॥
(५८)

यावद् विषय-वेताल आरोहति मनोभुवम् ।
क्षणेन भ्रान्ति-साम्राज्यं वितनोति निरङ्कुशम् ॥
(५९)

अलक्षितैव नयते विषयासक्ति-कामिनी ।
हठादपि प्रमुह्यन्तं, स्थानात् स्थानं, क्षणात् क्षणम् ॥
(६०)

तदधीनोऽविवेकात्मा भ्रान्त उन्मादवानिव ।
निमेषमात्र-विश्रान्तिक्लेशं न लभते क्वचित् ॥
(६१)

अहंपूर्वमहंपूर्वम्, इतीर्ष्याऽऽवेश-विह्वला ।
जिघत्सति सदा मूढान्, कामना नाम राक्षसी ॥
(६२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहन्ती धावते काचित्, प्रसह्याऽऽकर्षतीतरा ।
आलुञ्छति ततोऽन्योऽन्या पुनर्मध्ये विमुञ्चति ॥
(६३)

एका गता पराऽऽयाता, पुनरन्या गतेतरा ।
पुरतः पनरायाति कामना नाम राक्षसी ॥
(६४)

शान्ता क्वचित्, क्वचिद् घोरा, क्वचिन्मूढा, क्वचित्समा ।
अस्या नानाविधा चेष्टा, वक्तुं ज्ञातुं न शक्यते ॥
(६५)

कामना-मर्कटी चित्त-कानने विषयै र्घने ।
इतस्ततो यत्र कुत्र वेगाद् उत्प्लवते क्षणात् ॥
(६६)

दुराशाकर्कटी-कामा मर्कटी घस्मराऽऽमयैः ।
लम्बते कल्पना-वल्ल्यां, हा ! कष्टं दुरतिक्रमम् ! ॥
(६७)

निःसारो भारबहुलो मोहोऽहङ्कार आमयः ।
अविविच्य धृतो भ्रान्त्या, मर्कट्येव मृताऽर्भकः ॥
(६८)

अहङ्कृति-नटी चित्त-कामुकं भावभङ्गिभिः ।
क्वचित् स्वैरं क्वचिद् वैरं, प्रदर्श्य नर्तयत्यहो ! ॥
(६९)

संसार-रङ्गशालायां कामः खिङ्गोऽद्भुतोऽद्भुतम् ।
नाट्यं दर्शयतेऽनन्तं, विद्वानपि विमुह्यति ॥
(७०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणेनाऽधः क्षणेनोर्ध्वं, कामाश्वो यत्र कुत्रचित् ।
भ्रमयन् नर्तयन् वेगाद् अस्थाने पातयत्यसौ ॥
(७१)

काण्डात् काण्डात् प्ररोहन्ती, दूर्वा-दुर्वासनालता ।
स्वल्पापि प्रसरत्याशु, कच्चरे चित्त-चत्वरे ॥
(७२)

ईशावास्यमिदं सर्वं, श्रुत्यन्त घोषति श्रुतिः ।
ईर्ष्यावास्यमिदं सर्वं, शृणोति विषयि-श्रु तिः ॥
(७३)

जलावर्ते प्रपतितं जीर्णं लघु तृणं यथा ।
तथा भ्राम्यति चिन्तानां चक्रे स्वप्नेऽपि मानसम् ॥
(७४)

अनुगृह्णीष्व भगवन् ! नान्यो मान्यो मतो मम ।
दुःखदावेन संदग्धं, मामनाथं समुद्धर ॥
(७५)

दुस्त्यजो मे दुराचारो दयाचारो यथा तव ।
प्रपन्नोऽस्मि, दयासिन्धो! स्वभावः कथमन्यथा ?॥
(७६)

अनन्यनाथं मां नाथ ! सनाथय, न वाऽथवा ।
अनाथः प्रार्थयत्येव, स्वभावः कथमन्यथा ? ॥
(७७)

अधोऽधो धावते चेतो, नदीस्रोतो यथा द्रुतम् ।
ज्ञातास्वादश्चिराभ्यस्तः स्वभावः कथमन्यथा ? ॥
(७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथोर्ध्वं सर्पति ज्वालाऽधस्तत्पात् पक्व[१] आतुरः ।
कामान्धचित्तं सर्वत्र, स्वभावः कथमन्यथा ? ॥
(७९)

चिरेण विस्मरन्तं त्वां, स्वमात्मानं नराधमम् ।
मादृशं चाऽनुगृह्णीष्व, करुणा-वरुणालय ! ॥
(८०)

अभक्तोऽतीव संभाव्यः, प्रभुणा मुक्तचेतसा ।
निर्धनाय धनं दत्वाऽतितरां शोभते धनी ॥
(८१)

निर्गुणोऽपि च नोपेक्ष्यो, हन्त! त्वमपि निर्गुणः ।
मन्यसे सगुणं तर्हि, को गुणी गुणिनं त्यजेत् ? ॥
(८२)

तदस्ति ते चिरौत्सुक्यं यदनुत्तरपापिनम् ।
उद्धर्तुकामं, तत्पूर्त्यै कल्पते मादृशोऽधमः ॥
(८३)

कामिनी-यामिनी-क्रान्तो भ्रान्त आलोकदर्शने ।
घृणाऽऽकुञ्चित-घोण स्त्वां, घूकोऽर्कमिव नेक्षते ॥
(८४)

पापाचार-प्रवाहेण नैरन्तर्य-प्रवाहितः ।
तृष्णा नागी-गलग्रस्तः कः पश्येन् मृत्युमुन्मुखम् ॥
(८५)

---

१. स्याद्विनाशोन्मुखं पक्वम् - इत्यमरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्च्छत्याशु कुसंस्कार श्चित्ते, तैलमिवाऽम्भसि ।
ऋते तव कृपां जातु, न स शाम्यति कर्हिचित् ॥
(८६)

विषपानं सुधाहानं किं जिजीविषु रिच्छति ?।
मोक्षमूलं प्रभुं हन्त ! को मुमुक्षु र्जिहासति ॥
(८७)

छित्वा रसालं को विद्वान् रोहयेत् कण्टकि-द्रुमम् ।
हित्वा कल्पतरुं विज्ञः, को वाऽर्थी याचतेऽपरम् ॥
(८८)

रोषान् हृदि भरान् मूर्ध्नि, वहन्ते विषयैषिणः ।
तोषान् हृदि प्रभां मूर्ध्नि दधते सन्मनीषिणः ॥
(८९)

भगवन् ! सुशकं मन्ये, ज्वलदङ्गार-चर्वणम् ।
सर्वथा वासनातन्तो स्त्रोटनं तु सुदुःशकम् ॥
(९०)

स्पर्शमात्राद् अलर्कस्य विषेण हन्यते तनुः ।
विनाऽपि स्पर्शं स्मृत्यैव विषयेण तु निर्वृतिः ॥
(९१)

शुभाशुभमयी द्वेधा, वासना-सरित स्तटी ।
शुभायां सर्वथा नाथ ! रमतां मे मनोमृगः ॥
(९२)

वैराग्य-बीज-प्रभवो विचार-जलवर्धितः ।
फलेत् तृप्तिफलं देव ! मनोरथ-महीरुहः ॥
(९३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्कृपालेशमात्रेण दुःखान्ता दीर्घ-दीर्घिकाः ।
मरूभवन्ति नाऽन्योऽस्ति पन्था इत इहोत्तरः ॥

(९४)

चिन्तामणे ! कृपामूर्ते ! शरणागत-वत्सल ! ।
एषोऽस्मि वेदनोद्विग्नः संभावय निजात्मजम् ॥

(९५)

दहन ! मदीयं दह दुरितौघम् ।
गमय विभूमन् ! चिदमल-सौधम् ॥

(९६)

प्रकृति - विकारै रविकृतमूर्ते ! ।
निवस हृदब्जे ऽ भिलषितपूर्ते ! ॥

(९७)

अनुगतमृत्यु र्न पुन रुपेक्षे ।
प्रवितर बोधामृत— रससारम् ।

(९८)

क्षणमपि नाऽयं त्यजति दरिद्रः ।
वितर यथार्थं मणिमभयार्थम् ॥

(९९)

हसतु पुरस्ताद् विहरतु पश्चात् ! ।
सरतु समन्तात् तव सुषमा श्रीः ॥

(१००)

अविरल- गत्या सुसरल - वृत्त्या ।
अनुभवभूमौ स्फुटतु तव श्रीः ॥

(१०१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविचल - चित्तो विषय - निवृत्ते ।
स्वयमनुभूतं किमपि चकास्तु ॥
(१०२)

घटपट —वृत्ति - द्वितय — सुसन्धौ ।
किमपि विचित्रं स्फुटतु महस्ते ॥
(१०३)

गुणिगण — गण्या ! अनुपममेनम् ।
स्वहृदय — मध्ये ऽनुभवत देवम् ॥
(१०४)

सुकृत -- कृतज्ञा ! निविडचिदब्धौ ।
विहरत पूर्णे ऽमृतमणि -- लब्धौ ॥
(१०५)

न हि बहि रास्था परतर --निष्ठा ।
नरजनि-- भाजां फलमिह शिष्टाः ॥
(१०६)

निधि - विधिविज्ञा ! मति-निशितास्त्रैः ॥
खनत हृदुर्वीं, भवत कृतार्थाः ॥
(१०७)

चरम-विचारैः पुलकित-भावैः ।
परिचिनु कोऽहं, गहनतमोऽयम् ॥
(१०८

विकल- विचारैः परममहीयान् ।
अपि च सुदूरायित इव भाति ॥
(१०९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सफल-विवेके स पुन रणीयान् ।
अपि च न दूरे स्वहृदि चकास्ति ॥
(११०)

स्वयमनुभूते ! दहर-गुहायाम् ।
स्फुरतु तवाऽसौ शशिवदना श्रीः ॥
(१११)

× × ×

शारदे मानसाकाशे विवेकेन्दूदये सति ।
हर्षोत्फुल्ला चकोरीव कृतार्था स्यान्ममाऽम्बिका ॥
(११२)

पितः सुवर्णरेतास्त्वं सतीवृत्तिं ममाऽम्बिकाम् ।
प्रपुष्णीहि, कृतार्थः स्यां, बोधाऽमृत-पयोरसैः ॥
(११३)

सजातीयां विजातीयां स्वगतां भेदभावनाम् ।
न जानाति वराकी सा, दयस्व सरलाऽम्बिकाम् ॥
(११४)

त्वदेकशरणापन्नां, सदा तव पदाश्रिताम् ।
पतिव्रतां पतिप्राणां ममाऽम्बां पश्य धीमतीम् ॥
(११५)

समर्पित-मनोबुद्धिं सदा सेवापरायणाम् ।
आज्ञामिव परापूर्वां विलोकय तपस्विनीम् ॥
(११६)

प्रभूतपुण्यपूर्णां तां शुभसंस्कार-संस्कृताम् ।
कुलीनां कृपया पश्य, शान्तां ते सहधर्मिणीम् ॥
(११७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शम-सन्तोष-सत्सङ्ग-विचार-फल-सेवनैः ।
सदैकनिष्ठा मे माता संतुष्यति तपस्विनी ॥
(११८)

सरला कल्पवल्लीव मुक्तहस्ता मनस्विनी ।
दिष्टया ! दृष्टिपथं याति विवेकचण-चक्षुषाम् ॥
(११९)

अम्बिके ! विषयासक्तिर्न त्वामीक्षितुमीहते ।
पुंश्चली चञ्चलाऽपाङ्गी सतीमिव तपस्विनीम् ॥
(१२०)

मातः ! समर्पयिष्यामि फलं पूर्णरसाप्लुतम् ।
स्वीकुरुष्व समस्तं तद्, बालोल्लासविवृद्धये ॥
(१२१)

धनमानादि-हुंकारै श्चाण्डालै रनवेक्षितम् ।
शुद्धं तपः, क्षमा, शीलं, फलमेतत् समर्प्यते ॥
(१२२)

संपत्तौ निरहंकारो विपत्तौ नास्ति खिन्नता ।
सदान्तः शीतलो भावः, फलमेतत् समर्प्यते ॥
(१२३)

निरातङ्कं सदा स्वस्थं भ्रमज्वर-विवर्जितम् ।
केवलीभावमात्रं ते फलमेतत् समर्प्यते ॥
(१२४)

आस्वाद्य यत् समास्वाद्यं न च स्वाद्यान्तरं पुनः ।
शमाऽमृतफलं दिव्यं मात स्तुभ्यं समर्पये ॥
(१२५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतत्स्वपि दुरन्तेषु दुःखशैलेषु मूर्धनि ।
उच्चैःशिरोऽमलो भावः फलमेतत् समर्प्यते ॥
(१२६)

दुरन्तासु दुरूहासु विपत्ति-घनभूमिषु ।
अपि व्योमसमा शान्तिः, फलमेतत् समर्प्यते ॥
(१२७)

आयादिष्टमनिष्टं वा नोल्लासो न च खिन्नता ।
सुषुप्तिवत् समा वृत्तिः फलमेतत् समर्प्यते ॥
(१२८)

आगामिनि व्यतीते वा वर्तमानेऽपि वस्तुनि ।
अक्षुब्धाब्धि-समो भावः फलमेतत् समर्प्यते ॥
(१२९)

वाह्यक्रियासु संभ्रान्त इवान्तोऽचलवत् स्थिरः ।
हर्षामर्षैरविस्पर्शः फलमेतत् समर्प्यते ॥
(१३०)

सन्तोष-पयसा पुष्टो विवेकोऽमृत-जीवितः ।
एषोऽस्ति केवलीभावः फलमेतत् समर्प्यते ॥
(१३१)

प्राप्तेऽप्राप्ते समो भावो न हर्षो न च रोदनम् ।
शमेन पूर्णा सन्तोषः फलमेतत् समर्प्यते ॥
(१३२)

अप्राप्ते नास्ति वाञ्छापि, प्राप्ते द्वेषो नवा स्पृहा ।
विवेक--तृप्तः सन्तोषः फलमेतत् समर्प्यते ॥
(१३३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवेक-शम -सन्तोषोत्पन्नं सत्सङ्गसङ्गतम् ।
विलक्षणरसं दिव्यं फलमेतत् समर्प्यते ॥

(१३४)

पदार्थो द्विविधो दृष्टो द्रष्टृदृश्य-विभागतः ।
दृश्याद् विलक्षणो द्रष्टा सर्वत्रैवाऽनुभूयते ॥

(१३५)

स्वं परं यो विजानाति, स द्रष्टा चेतनः स्वयम् ।
स्वयं स्वमेव नो वेत्ति स दृश्यो जड-लक्षणः ॥

(१३६)

गृहाद् भिन्नो गृह-द्रष्टा, स्वं, परं वेत्ति चेतनः ।
स्वयं स्वमपि नो वेद, जडो देहो जडं निजम् ॥

(१३७)

रूपं, गन्धो, रसः, स्पर्शः शब्दश्च विषया इमे ।
दृग् एषां, नयनं, नासा, जिह्वा, त्वक्, कर्ण इन्द्रियम् ॥

(१३८)

दृगस्ति मन एतेषां प्राणसारमथाऽस्य धीः ।
तस्या अहङ्कृतिस्तस्या अविद्योपाधि-चेतनः ॥

(१३९)

तस्य द्रष्टेश्वरो मायोपाधिकः सर्वशक्तिमान् ।
कर्ता भर्ता च संहर्ता, माया-ललितलीलया ॥

(१४०)

अव्यक्ताद् व्यक्तपर्यन्तं जडं देहेन्द्रियादिकम् ।
यद्भासा भासितं सर्वं, सैष साक्षी प्रकाशकः ॥

(१४१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वं परम् अभावं यं मध्यं भावं तथान्तरम् ।
साक्षात् करोति यः साक्षात्, स साक्षात् साक्षि-चेतनः ॥
(१४२)

ततोऽपि निष्प्रपञ्चो यः प्रकाशः परमाद्भुतः ।
त्वमेकश्चिन्मयः शान्त, आत्माऽसि परमेश्वर! ॥
(१४३)

सूक्ष्मं विवेचिते सम्यङ्, न किञ्चित् त्वदनुत्तरम् ।
शुक्तौ रजतवत् सर्वं, जगत् त्वयि विवर्तते ॥
(१४४)

एवं विचार-पूजानां प्रसादाऽऽस्वाद-माधुरी ।
अतिक्रान्तोपमाकोटी, फलमेतत् समर्प्यते ॥
(१४५)

नमो भगवते तुभ्यं सर्वभूतैक--साक्षिणे ।
नीरूपायात्मरूपायाऽहंमात्रैकाऽनुभूतये ॥
(१४६)

यत् किञ्चिद् भासते भास्यं त्रिपुटी तस्य भासिका ।
तस्या भासक ईश! त्वं, बोधैकघन-विग्रहः ॥
(१४७)

उदेति त्रिपुटी त्वत्त स्त्वयि तिष्ठति लीयते ।
त्वं ततः सर्वथा भिन्नोऽभिन्नोऽपि स्वात्मसत्तया ॥
(१४८)

सर्वाधिष्ठान—रूपत्वात् सर्वाधिष्ठेय—वस्तुनः ।
तव सत्तातिरिक्तान्यसत्ताऽभावाद् अवस्तुता ॥
(१४९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यमानं च यत् किञ्च, बाह्यं वाऽभ्यन्तरं क्वचित् ।
अवस्तु स्पन्दमात्रं तद्, वस्तु त्वं परमेश्वर ! ॥
(१५०)

भासमानमिदं मूर्तं यच्चाऽमूर्तमगोचरम् ।
व्यक्ताऽव्यक्तमभिव्याप्य, महिमा ते विजृम्भते ॥
(१५१)

स्थावरं जङ्गमं किं वाऽनन्तं ब्रह्माण्ड-मण्डलम् ।
तवैव रूपं भगवन् ! पश्यन्ति ज्ञानयोगिनः ॥
(१५२)

तवाऽतिरिक्तं पश्यन्तो भ्रान्तिज्ञानेन वञ्चिताः ।
परमार्थस्त्वमेवैको नाऽहं, नेदं, न किञ्चन ॥
(१५३)

अवलम्ब्य स्वमात्मानं त्वां, ते पुण्या मुमुक्षवः ।
समायाता यतः पूर्वं पुनस्तत्रैव संगताः ॥
(१५४)

त्वं पूर्णात्माऽजरो नित्योऽपरिणम्यो निरञ्जनः ।
निर्धर्मा निर्गुणोऽकर्मा विष्वग्-व्यापी स्वयंप्रभः ॥
(१५५)

अप्रमेयः सदाऽखण्डो वस्तुतन्त्रोऽव्ययोऽचलः ।
चिद्घनो बोधविज्ञानः सदानन्दो निरावृतः ॥
(१५६)

प्रपञ्चावर्त—निर्मुक्तः, परमज्योति रद्भुतः ।
अनाख्येयो निर्विकल्पः, सुप्रसीद विभावसो ! ॥
(१५७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं श्रद्धाऽर्हणाभक्तिविचार – प्रभयोज्ज्वला ।
स्तवराजोल्लसन्माला सफलेयं समर्प्यते ॥
(१५८)

सारः शरीरं भूतानां सार स्तस्येन्द्रियं तथा ।
तस्य प्राणानिलः सारः, सार स्तस्यापि मानसम् ॥
(१५९)

तस्य सारो मति स्तस्याः सारोऽहङ्कार ईरितः ।
तस्य सारो महत्तत्त्वं, तत्सारोऽव्यक्तमस्य च ॥
(१६०)

संवेदोन्मुख– संवित्त्वं, यद् दृश्याऽभिमुखेशता ।
चराचराणां जगतामुत्पत्तेर् मूलकारणम् ॥
(१६१)

तत्सारो निर्विकल्पो यः परिपूर्णो महेश्वरः ।
अद्वितीयः प्रकाशात्मा चिन्मात्राऽनुभवो भवान् ॥
(१६२)

इत्थं सोपानमारोहेऽवरोहे चाऽन्यथा क्रमः ।
चिन्मात्रे निर्मले व्योम्नि, स्पन्दते चित्कला–घनः ॥
(१६३)

वृष्टिं वर्षत्यसौ विद्यामविद्यां लीलयात्मनः ।
विद्या समष्ट्यहंभावो महासागरसन्निभः ॥
(१६४)

अविद्या व्यष्टयहंभाव स्तरङ्गो, बुद्बुदो यथा ।
स्वरूपस्य स्मृति र्विद्या,ऽविद्या विस्मृति–रूपिणी ॥
(१६५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभ्यामेव विकल्पाभ्याम् ईशजीव-प्रकल्पना ।
अनयो रन्तरं तावद्, यथास्ति वनवृक्षयोः ॥
(१६६)
मायाविनं जगन्मूल मीशं नो मोहयत्यसौ ।
स्वस्याऽधीनतया माया, मायाकारं यथा जनम् ॥
(१६७)
ऐन्द्रजालिक-संसारः प्रतीतिविषयो यथा ।
अज्ञस्यैव न विज्ञस्य भानमात्रमवस्तु तत् ।
(१६८)
मृगतृष्णा समा भाति, मरौ मृगमनुष्ययोः ।
वस्तुबुद्धया मृगो बद्धो,ऽवस्तुबुद्धया न मानुषः ॥
(१६९)
सृष्टि-तन्तुं वितन्वन् सन् स्थापयन् संहरन्नपि ।
ईशः स्वतन्त्रो रमते, लूताकीट इवेच्छया ॥
(१७०)
अनुप्रविष्टमात्मानम् ईशं विस्मृत्य संसरन् ।
अविद्यया समाकृष्टो ऽवरोहति यथाक्रमम् ॥
(१७१)
इत्थमुत्तरतोऽधोऽधोऽवतरन् विस्मृतः स्वयम् ।
अनात्मभूत-संघातो देहोऽहमिति मन्यते ॥
(१७२)
देहात्मत्वेन तद्रूपा चिराद् रूढिमुपागता ।
कर्मजा वासना नाम देहोऽहमिति निश्चया ॥
(१७३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्लिष्य कामना-कान्तां दृढयन् भोगवासनाम् ।
तया सहैव रमते, स्वयं मुह्यति कूर्दते ॥
(१७४)

निराकाशो घटो नेह, निराभासं मनस्तथा ।
तदेवाहं प्रमातेति सहजा भोगवासना ॥
(१७५)

अनुप्रविष्टे त्वय्येव, सर्व-साक्षिणि हे प्रभो ! ।
भ्रान्ति-वासनयात्मानं, त्वामन्यमिव मन्यते ॥
(१७६)

आत्मनि त्वयि विज्ञानं, न किञ्चिदपि चिन्तनम् ।
यथा भवति तन्मे स्याज्जुहोम्यात्मानमात्मना ॥
(१७७)

तव प्रसाद-मात्रेण वासनात्क्षय-संभवः ।
इत्यालोच्य प्रपन्नोऽस्मि, सुप्रसीद विभावसो ! ॥
(१७८)

इत्थं विचारपूजानां निर्णयस्य चमत्कृतिः ।
अनुभूति-विभूतिर्या, फलमेतत् समर्प्यते ॥
(१७९)

क्षय्यं जय्यं समूलं यद् विश्वम, आत्मरसायनम् ।
अत्यद्भुतं स्वसंवेद्यं, मातस्ते किं न रोचते ? ॥
(१८०)

विचार-वृक्षप्रभवं तुष्टिपुष्टि-रसान्वितम् ।
पूर्ण-तृप्तिफलं हन्त ! मातस्ते किं न रोचते ? ॥
(१८१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यल्पं सरसं हृद्यं फलं तुभ्यं समर्पितम् ।
क्षमस्व हे तपोमूर्ते ! पतिप्राणाः कुलस्त्रियः ॥
(१८२)

मया पुत्रवतीत्वं ते, मातृमत्त्वं त्वयाऽपि मे ।
भक्ति-स्नेहमयं सूत्रं सम्बद्धं दृढमावयोः ॥
(१८३)

अदूषित मनाघ्रातं दम्भ-कुक्कुर-वृत्तिभिः ।
मनोवाग्वपुषां कर्म किं ते न स्यात् ? प्रसत्तये ॥
(१८४)

नदीमुखमिवाम्भोधि-गाहने यादसां गतिः ।
परिपूर्णपदारोहे त्वमेवाऽस्योल्बणा स्मृतिः ॥
(१८५)

शक्तिमूर्तिर्ममाऽम्बेयं पिताऽयं सर्वशक्तिमान् ।
स्वाहाऽग्नी जयतो नित्यं मदेकसुतवत्सलौ ॥
(१८६)

द्रवन्मनाः स्खलद्वाणि धृताऽञ्जलिपुटो लुठन् ।
पितरौ क्षमयन् दोषान् पतामि श्रीपद-द्वये ॥
(१८७)

प्रसीद भगवत्यम्ब ! प्रसीद भगवन् ! पितः ।
पूर्णा शान्तिः प्रसरतु, पूर्णा स्थितिरुदीयताम्[1] ॥
(१८८)

---

१. ईङ् गतौ (दैवादिकः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्भुतशक्ते ! विश्वपते ! सत्यविभूते! स्वैरगते ! ।
चिन्मयमूर्ते ! स्वीकुरु मे, तुच्छमपि स्यात् पुष्पमिदम् ॥
(१८९)

निर्गतभीते ! सर्वगते! मञ्जुल-गीते ! पूर्णकृते ! ।
निर्मलनीते ! स्वीकुरु मे, तुच्छमपि स्यात् पुष्पमिदम् ।
(१९०)

शीतलकान्ते! व्योमतते! प्रोज्ज्वल-शान्ते ! मोदमते ! ।
विस्तृतकीर्ते ! स्वीकुरु मे तुच्छमपि स्यात् पुष्पमिदम् ॥
(१९१)

भेदविमुक्ते ! मुक्तिसूते ! दीधितिदीप्ते ! दिव्यधृते ! ।
मङ्गलमूर्ते ! स्वीकुरु मे, तुच्छमपि स्यात् पुष्पमिदम् ॥
(१९२)

उद्धव-शेषाद्भक्ति-विशेषाद्,
उत्सुक-भावाद् बाल-विनोदात् ।
अर्पित-गुच्छं किंच न तुच्छं
स्वीकुरु शोचिष्केश ! परेश ! ॥
(१९३)

गौतम-वंश्यः सैष गणेशः
प्रार्थयते त्वां हे जगदीश ! ।
स्व स्वयमद्यैवाऽर्पयतीह,
पूरण ! पूर्णात् पूरय पूर्णम् ॥
(१९४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रपञ्च-शैल-शृङ्गाणां, छेदने मूलभेदने ।
अकुण्ठितष्टङ्क इव, टङ्कनाथोऽग्निमान् पिता ॥
(१६५)

बालकस्याऽस्य जननी प्रबोधामोदवर्द्धिनी ।
सच्चरित्रा पवित्राऽपि विजयेतां स्वधामनि ॥
(१६६)

आकाशसन्निभ-निरावृत-'सत्'प्रकाशो
द्वैत-प्रपञ्च-रण-शक्तिधर-प्रकाशः ।
नित्यो विभावसु-विभाद्भुत-'चित्'प्रकाशो
विद्योततां 'सुख'घनः स महाप्रकाशः ॥
(१६७)

जाग्रत्-स्वप्नसुषुप्ति-वृत्तितुलयाऽतीतस्तुरीयाद्भुतो
निद्रालोर्जगतः प्रबोध-कलया निःसीममुज्जृम्भितः ।
पूर्णात् पूर्णतरः परात् परतरः 'सत्यः, शिवः, सुन्दरः'
विश्वात्मैष विभावसुर्विजयतां विद्योततां थोऽव्ययः ॥
(१६८)

ॐ शान्तिः ! ॐ शान्तिः !! ॐ शान्तिः !!!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संशोधनपत्रम्

पृष्ठम्	पङ्क्तिः	श्लोकः	अशुद्धम्	शुद्धम्
क	१		महोदस्य	महोदयस्य
ख	१०		स्तुयं	स्तुत्यं
ग	९		प्रार्थनातुष्पम्	प्रार्थनापुष्पम्
ग	११		मभिवादयदि	मभिवादयते
ग	१५		पुनरष्टुनुपः	पुनरनुष्टुपः
घ	३		कृष्णादेव्याः	तृष्णादेव्याः
ङ	१५		प्रतिष्ठिापिता	प्रतिष्ठापिता
च	२	५५	प्रसत्यर्थं	प्रसत्त्यर्थं
च	१२	५८	धन्येयं ने	धन्येयं मे
च	१३	५९	दोर्डण्ड	दोर्दण्ड
छ	१५		मे मन्यते	मेव मन्यते
ज	४	१	निराधर	निराधार
ज	२६		साक्षीस्वरूपः	साक्षिस्वरूपः
ञ	१८		यत्रापथः	यात्रापथः
ञ	५	२५	सर्वतन्त्राणां	सर्वमन्त्राणां
ञ	५	२५	धनिमनिनाम्	धनिमानिनाम्
ट	२४		समीचीनेमेव	समीचीनमेव
ठ	१		वरोऽ	वरोऽपि
ठ	१६		प्रकाशिता	प्रकाशिताः
ठ	१९		प्ररणार्थं	प्रेरणार्थं
ड	१३	९	वान्धवतां	बान्धवतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्ठ म्	श्लोकः	अशुद्धम्	शुद्धम्
त	१२	सकृतेः	संस्कृतेः
२	७	क्षिप्तान	क्षिप्तान्
२	११	कुञ्चित्	कुञ्चित
२	१२	प्रभु	प्रभुं
६	४३	क-ण्ठस्य	कण्ठस्य
८	५७	समाः मासा	समा मासा
८	६२	व्रत	व्रत
१३	१०२	द्रतः	द्रुतः
१४	१०५	पूर्णात्मन्न्	पूर्णात्मन्न्
२४	४१	हव्यभक्	हव्यभुक्
२६	५६	माम	माम्
२९	८१	दत्वा	दत्त्वा
३०	८८	छित्वा	छित्त्वा
४१	१७४	दृढयन्	द्रढयन्
४३	१९४	स्व	स्वं
४३	१९४	ऽपर्यतीह	ऽर्पयतीह

मुद्रणाऽवसरे तैस्तैं र्बहुभि र्विघ्नकारणैः ।
न जाताऽपेक्षिता शुद्धि र्यत्नो मे निष्फलायितः ।।
उपरिष्टाद् विनिर्दिष्टाऽशुद्धि र्नैतावती खलु ।
अन्यापि संभवेद् याचे क्षमां, मे मित्रगौतम ![1] ।।

— बलराम "श्रमजीवी"

---

१. न्यायशास्त्रविचक्षणस्य चातुर्मास्य-याजिनश्चन्द्रशेखरमहोदयस्य पौत्रः श्रीगणेशप्रसादगौतमः योऽयं विद्यार्थि-जीवनादेव ममाऽतिशयस्नेही मित्रवरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गणेशप्रसादः गौतमः

[पशुपति-चारशिवालय-काष्ठमण्डपम् (नेपालः)]

स्ववंश्य-गौतमै श्चिरात् त्वमद्ययावदर्चितः ।
स्ववंशपुष्प-सौरभ ! स्वहिन्दु-राष्ट्र-गौरव ! ॥

विभावसो ! विबोध्य तान् प्रसुप्त-विश्वमानवान् ।
नयस्व शान्ति-शीतलां नवीन-जीवनीच्छटाम् ॥

विचित्रविश्व-वाटिका-क्रियाकलाप-कोविद ! ।
मनोमधुव्रतोऽस्तु मे पदम्बुजे वशंवदः ॥

न मुञ्च नाथ! कर्हिचिन् ममाऽन्वयं च नीवृतम् ।
अहं गणेशगौतमः पुनः पुनः प्रकामये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu